Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नेपालराजकीय-
वीरपुस्तकालयस्थपुस्तकानाम्

बृहत्सूचीपत्रम्

यस्यायं

नाटक(रूपक)ग्रन्थविषयक-
स्तृतीयो भागः

बुद्धिसागरशर्मणः
अध्यक्षतायां
वीरपुस्तकालयतः सम्पादितः प्रकाशितश्च

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पुरातत्त्वप्रकाशनमाला-६

नेपालराजकीय-

वीरपुस्तकालयस्थलिखितपुस्तकानाम्

बृहत्सूचीपत्रम्

तस्यैतस्य

नाटक(रूपक)ग्रन्थविषयक-

स्तृतीयो भागः

बुद्धिसागरशर्मणः अध्यक्षतायां

वीरपुस्तकालयतः सम्पादितः प्रकाशितश्च

प्रथमं संस्करणम्
काष्ठमण्डपः

शुभजन्मोत्सवः
वि. सं. २०१९

मूल्यम् रूप्यकद्वयम्

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वीरगणेश प्रेस, काठमाडौं।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वक्तव्य

वीरपुस्तकालय ज्ञानको संगम स्थल हो। यहाँ जे छन् ती अन्त छैनन् र जे अन्त छैनन् ती यहाँ छन्। पुस्तकहरूको वैज्ञानिक ढङ्गले क्रमिक चरित्र खिचेर सूची निर्माण नगरून्जेलसम्म पुस्तकालयको प्रशासन सदैव दयनीय नै देखा पर्नजान्छ। पुस्तकालयको नाभिनै उस्को सूचीपुस्तिका हो। यस्को अभावमा अनुसन्धान कर्तालाई दुःख हुनाका साथै यस संस्थाको मर्यादामा समेत धक्का लाग्न जानु स्वाभाविक नै हो। लहरे मिलेका सेता दाँतहरू जसरी राम्रामा गनिन्छन् त्यसरी नै रूजु गरियेर मिलेर रहेका पुस्तकहरू राम्रामा गनिनेछन्। वीरपुस्तकालय द्वारा वेला वेलामा वेग्ला वेग्लै विषयमा क्रमाक्रम सूचीपत्रहरू निकालिदैछन् जुन क्रमको यो तेश्रो रूप हो। यस पटक नाटक सम्बन्धी सूची सबैको सामु आउँदैछ। हाम्रो साहित्यक परंपरामा नाटकको महत्वपूर्ण स्थान छ। यसको पूर्व इतिहास र परिचय विभिन्न पुस्तकहरूको उद्धरण सहित यस सूचीमा पेश गरीएको छ। आशा छ नाटको यस सूचीको प्रकाशनले हाम्रो यौटा ठूलो खाँचोलाई टार्नेछ।

रमेशजङ्ग थापा
डाइरेक्टर
श्री ५ को सरकार
पुरातत्त्व र संस्कृति विभाग

काठमाण्डू
२०१९। २। २९

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भूमिका

अनादावनन्ते चास्मिञ्जगत्प्रवाहे पुस्तकालयस्थापनाप्रवाहोऽप्यनादिरनन्तएव। द्विपरार्धायुषा ब्रह्मणः अहोरात्रपरिमितः कालो मर्त्यानां कल्पः प्रतिकल्पं च ब्रह्मा अहनि सृष्टिं विधत्ते, निशामुखे सर्वं संहृत्य सर्वाणि जगन्ति स्वस्मिन् तिरोभाव्य शेते। एवं ब्रह्मणो दिवारूपः कालः सृष्टिकालः। निशारूपः कालः प्रलयकालः। सोऽयं ब्रह्मा निशावसाने प्रबुद्धः सन् प्रातः सृष्ट्यै प्रयतते। तत्र मात्स्यन्यायेन अबलीयांसं बलीयान् मास्मखादत् इति किमपि धर्मपदव्यपदेश्यं जगतः शासनकर्तृ तत्त्वमप्यसृजत्। तस्यैतस्य विश्वव्यवस्थापकप्रथमविधानरूपस्य तत्त्वस्य श्रुतिरूपेण स्मृतिरूपेण च सम्यक्प्रतिपादनं व्यधायि। तादृशानां प्रथमविधानसंहितानां रक्षणविधौ ब्राह्मणाः प्रयोगविधौ च क्षत्रिया न्ययुज्यन्त। वेदपदव्यपदेश्यास्तादृश्यः संहिताः पुराकल्पे शङ्खासुरहिरण्याक्षहयग्रीवप्रभृतिभिरसुरैः सर्वा अपाह्रियन्त। तदानीन्तनानां ब्राह्मणानां राजन्यानां च प्रार्थनया मत्स्य-वराह-हयग्रीवादिरूपधारिणा भगवता नारायणेन अपहृताः सर्वा एव संहिता उदध्रियन्तेत्यादिपौराणिकी गाथा अस्माकं परंपराप्रसिद्धा।

देशानुसारं कालानुसारं संप्रदायानुसारम् अनन्तभेदभिन्नास्तादृश्यः संहिताश्च नानाशाखारूपेण भिन्नतामुपगताः। जगन्ति शासितुं सिंहासने स्थापितेन राज्ञा तादृशाः संहितागून्थाः तेषामभिज्ञाश्च संग्राह्याः। तत्र गून्थसंगूहः पुस्तकालयः तदभिज्ञसंगूहश्च विद्वत्परिषद्रूपः "चत्वारो धर्मशास्त्रज्ञाः पर्षत् त्रैविद्य एव वा" इत्यादिस्मृतिप्रसिद्धः। सोऽयमादृशः पुस्तकालय एतस्मिन्नेपालेपि ऐतिहासिकैः प्राचीनै राजभिः स्वेस्वे राजप्रासादे स्थापित एव। तत्र आवश्यकतानुसारं धर्मगून्था आगमगून्था वेदाः उपवेदाः षडङ्गानि दर्शनानि साहित्यकाव्यनाटक(रूपक) नाट्यगून्थाः पुराणानि इतिहासाः शिल्पगून्था वास्तुगून्थाः स्वरचिता अन्यरचिता अन्येन्ये च विविधा गून्थाः संगृहीता आसन्। त एव ग्रन्थाः श्री ५ पृथ्वीनारायणशाहदेवेन राष्ट्रियैकतासंपादनोत्तरं सर्वतः संगृह्य एकत्र स्थापिताः। सोऽयं संग्रहो "दर्बार लाइब्रेरी" "वीरपुस्तकालयः" इत्यादिविभिन्ननाम्ना व्यपदिश्यते। तस्मिन्नेतस्मिन् पुस्तकालये स्थितानां पुस्तकानां बृहत्सूचीपत्रप्रकाशनप्रसङ्गे ऽयं तृतीयो भागः नाटक-(रूपक) ग्रन्थविषयकः प्रस्तूयते। मन्ये चैतेन इतिहासे संस्कृतौ सामाजिकविज्ञाने नेपालीयरूपकपरंपरायां च अनुसन्धानपराणां विदुषां छात्राणां च कोऽप्युपकारो भवेदेवेति। तदत्र संपादनशोधनादिकार्येषु यत्किञ्चिदपि व्यापृताः कृष्णप्रसाद, देवीप्रसाद, शङ्करमान, घनश्याम, बाबुकृष्ण, पूर्णरत्न प्रभृतयोऽत्रत्याः सर्वेपि विद्वांसः अन्ये च कर्मचारिणः सर्वदा धन्यवादार्हा इति विलिख्य लेखनीव्यापारतो विरमति।

नेपालराजधानी
२०१९ श्री ५ महेन्द्र-
शुभजन्मोत्सवः

विद्वत्पदपद्ममिलिन्दो
बुद्धिसागरः पराजुलिः
अध्यक्षो वीरपुस्तकालयस्य

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अनर्घराघवनाटकम्

विषयाङ्कः १

क्रमाङ्कः प्र. १४४०

ग्रन्थकारः—मुरारिः। नेपालीयं कागतम् । नेवारा लिपिः। पङ्क्तयः ७ । आकारः १४$\frac{1}{5}$×३$\frac{1}{5}$। ग्रन्थसंख्या १८०० । पत्रसंख्या ६८।

आदिवाक्यम्।

ॐ नमो महागणेशाय । निष्प्रत्यूहमुपास्महे भगवतः कौमोदकीलक्ष्मणः । कोकप्रीति-चकोरपारणपटू ज्योतिष्मती लोचने । याभ्यामर्थविबोधमुग्धमधुरश्रीरर्धनिद्रायितो नाभीपल्वलपुण्डरीकमुकुलष्कम्बोः सपत्नीकृतः । अपिच । विरमति महाकल्पे नाभी यथैक निकेतनस्त्रिभुवनपुरः शिल्पी यस्य प्रतिक्षणमात्मभूः ॥ किमधिकरणा कीदृक्कस्य व्यवस्थितिरित्यसावुदरमविशद् द्रष्टुं तस्मैं जगन्निधये नमः । नान्द्यन्ते सूत्रधारः ।

पुष्पिकावाक्यानिः—

इति निष्क्रान्ताः सर्वे मुनीन्द्रसंवादो नाम प्रथमोऽङ्कः ।

" " कुमारविजयो नाम द्वितीयोऽङ्कः ।

" " तृतीयोऽङ्कः ।

" " चतुर्थोऽङ्कः ।

" " सुग्रीवाभिषेको नाम पञ्चमोऽङ्कः ।

" " षष्ठोऽङ्कः ।

" " नायकानन्दो नाम सप्तमोऽङ्कः ।

अनर्घराघवनाटकम्

विषयाङ्कः २

क्रमाङ्कः प्र. १५८३

ग्रन्थकारः- मुरारिः । ताडपत्राणि । मैथिली लिपिः । पङ्क्तयः ५ । आकारः १३$\frac{1}{2}$×१$\frac{?}{?}$ ग्रन्थसंख्या २८०० । पत्रसंख्या ११० ।

अनर्घराघवनाटकम्

विषयाङ्कः ३

क्रमाङ्कः १५०७ ।

ग्रन्थकारः मुरारिः। नेपालीयं कागतम् । नेवारी लिपिः । पङ्क्तयः ५।६ आकारः ६×२$\frac{3}{8}$। ग्रन्थसंख्या २००० । पत्रसंख्या १६७ । मध्ये पत्रं १ खण्डितम् ।

समयः ने. सं. ७०६

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अनर्घराघवनाटकम्

क्रमाङ्कः प्र. १६३४। विषयाङ्कः ४

ग्रन्थकारः- मुरारिः। ताडपत्राणि। मैथली लिपिः। पङ्क्तयः ५। आकारः १४$\frac{७}{८}$ × २$\frac{१}{२}$। ग्रन्थसंख्या १७००। पत्रसंख्या ११३। आद्यन्तखण्डितम्

अनर्घराघवनाटकटीका

क्रमाङ्कः प्र. १४०३। विषयाङ्कः ५

टीकाकारः- रुचिपतिः। नेपालीयं कागतम्। मैथिली लिपिः। पङ्क्तयः १०। आकारः १६ × ३$\frac{१}{२}$। ग्रन्थसंख्या ३५००। पत्रसंख्या ७३। अपूर्णा।

अनर्घराघवनाटकटीका मनोरमा

क्रमाङ्कः प्र. १४८२ विषयाङ्कः ६

टीकाकारः- रुचिपतिः। नेपालीयं कागतम्। मैंथिली लिपिः। पङ्क्तयः ९। आकारः १३ × २$\frac{७}{८}$। ग्रन्थसंख्या ३९००। पत्रसंख्या १६३। मध्येपत्रं १ खण्डितम्।

समयः ८१८

अन्धकासुरवधोपाख्यानम् (नेवारभाषामयम्)

क्रमाङ्कः प्र ३६५ विषयाङ्कः ७

ग्रन्थकारः जयरणजितमल्लः। नेपालीयं कागतम्। नेवारी लिपिः। पङ्क्तयः ८। आकारः ८$\frac{३}{४}$ × ४ ग्रन्थसंख्या ७००। पत्रसंख्या ४६। समयः ने. सं ८८८। पूर्णम्।

आदिवाक्यम्।

श्री ३ नृत्यनाथाय नमः। खिसम्। आदौ नान्दीश्लोकः।

सानन्दं "फणिवृन्दभूषिततनुश्चन्द्रावतंसो विभुः स्फूर्ज्जद्दानवकं च भस्ममकरोत्स्वीये वरेणाधमम्। चंचच्चामरकिन्नरीगणमुदा संवीजितं स्त्रीसमम्। पाया(न्)नर्तनताल-रक्षणपरो नृत्येश्वरस्सर्वदा॥

पुष्पिकावाक्यानिः—

इति श्रीप्रथमोऽङ्कः।

इति श्रीद्वितीयोऽङ्कः।

इति श्रीतृतीयोऽङ्कः।

इति श्रीचतुर्थोऽङ्कः।

इति श्रीश्रीजयरणजितमल्लदेवविरचिते अन्धकासुरोपाख्याननामनाटके पञ्चमोऽङ्कः समाप्तः।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अन्तिमवाक्यम्

भीमस्यापि रणे भङ्गो मुनेरपि मतिभ्रमः। यथा दृष्टं तथा लिखितं मम दोखो(षो) न दूःखनम्(दूषणम्) समयः सं ८८८ मार्गवदि ११ वृहस्पतिवार।

अभिज्ञानशाकुन्तलम्

विषयाङ्कः ८

क्रमाङ्कः प्र. ३२५

ग्रन्थकारः कालिदासः। मध्यदेशीयं कागतम्। देवनागरी लिपिः। पङ्क्तयः १०। आकारः ८$\frac{१}{२}$×३$\frac{३}{४}$। ग्रन्थसंख्या ५००। पत्रसंख्या २८। समयः वि. संवत् १७८७। आदिखण्डितम्।

खण्डितोत्तरमादिवाक्यम्–

राजा पूर्वस्थानमुपेत्य सनिश्वासम्, अहो विघ्नवत्यः प्रार्थितार्थसिद्धयः। मया हि-मुहुरङ्गुलिसंवृताधरोष्ठं प्रतिषेधाक्षरविक्लवाभिरामम्। मुखमंसविवर्त्ति पक्ष्मलाक्ष्याः कथमप्युन्नमितं न चुम्बितं तत् ॥२३॥

पुष्पिकाः—

इति निष्क्रान्ताः सर्वे तृतीयोऽङ्कः।
" चतुर्थोऽङ्कः।
" पञ्चमोऽङ्कः।
" षष्ठोऽङ्कः।

अन्तिमवाक्यम्—

प्रवर्त्ततां प्रकृतिहिताय पार्थिवः सरस्वती श्रुतिमहती महीयताम्। ममापि च क्षमयतु नीललोहितः पुनर्भवं परिगतभक्तिरात्मभूः ॥ ॥ इति निष्क्रान्ताः सर्वे सप्तमोऽङ्कः। समाप्तं चेदं महाकविकालिदासविरचितमभिज्ञानशाकुन्तलं नाम नाटकम्॥ ॥ लिखितमिदं काश्यां शुकदेवाभिधेनोपाध्यायोपनाम्ना ॥ संवत् १७८७ ॥

अभिनवप्रबोधचन्द्रोदयनाटकम् (ने. भा. स.)

विषयाङ्कः ६

क्रमाङ्कः प्र. ११५४

ग्रन्थकारः राजा जगज्जयमल्लः। नेपालीयं कागतम्। नेवारी लिपिः। पङ्क्तयः ७। आकारः ११$\frac{३}{८}$×३$\frac{३}{४}$। ग्रन्थसंख्या १२०। पत्रसंख्या ७। अपूर्णम्।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अभिनवप्रबोधचन्द्रोदयः

क्रमाङ्कः प्र. १४४२ विषयाङ्कः १०

ग्रन्थकारः जगज्जयमल्लः। नेपालीयं कागतम्। नेवारी लिपिः। पङ्क्तयः ७। आकारः ११$\frac{१}{७}$×३$\frac{७}{८}$। ग्रन्थसंख्या १२००। पत्रसंख्या १३४। समयः ने. सं. ८५४।

आदिवाक्यम्—

श्री ३ नृत्यनाथाय नमः। यज्ज्ञानेन विभाति वस्तु निखिलं विद्युच्छटासन्निभं ज्ञानाभावतयानृतं भ्रमवशात्सत्यं जगद्भासते। तन्नित्यं शशिशेखरं परचिदानन्दात्मकं निर्मलं सर्वज्ञं वरताण्डवैकनिरतं श्रीनृत्यनाथं भजे॥ नान्दीमे। रागमालव। नवमान। जयनाटेश्वर वसनवघम्बरनागभूषणसुन्दरिशक्तिधरे अघअङ्गे कलुषविदारण भवभयतारण सुरमुनिपूजित सङ्गे। जय जय निरञ्जनदेव॥॥ध्रु॥

पुष्पिकावाक्यानि—

इति श्रीमन्महाराजाधिराजतरणिकुलकौस्तुभायमाननेपालेन्द्र श्री ३ युतजगज्जयमल्लदेवविरचिते प्रबोधचन्द्रोदयनामनाटके प्रथमोऽङ्कः।

" द्वितीयोऽङ्कः।

" तृतीयोऽङ्कः।

" चतुर्थोऽङ्कः।

" पञ्चमोऽङ्कः।

" षष्ठोऽङ्कः।

" सप्तमोऽङ्कः।

" अष्टमोऽङ्कः।

" नवमोऽङ्कः।

" दशमोऽङ्कः।

" एकादशोऽङ्कः।

" द्वादशोऽङ्कः।

" त्रयोदशोऽङ्कः।

" चतुर्दशोऽङ्कः।

" पञ्चदशोऽङ्कः।

अमृतोदयनाटकम्

क्रमाङ्कः प्र. १४१८ विषयाङ्कः ११

ग्रन्थकारः गोकुलनाथः। नेपालीयं कागतम्। देवनागरी लिपिः। पङ्क्तयः ११। आकारः ११$\frac{३}{३}$×४$\frac{३}{४}$। ग्रन्थसंख्या ६००। पत्रसंख्या ३०। समयः १८४८।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

आदिवाक्यम् ।

ॐ नमो भगवते वासुदेवाय ॥ ब्रह्माण्डबिन्दुगणवर्षणवारिवाह वज्रं च मुञ्चसि निषिञ्चसि जीवनं च । सृष्टन्त्वया स्वपरदृष्टिविलोपकष्टं निर्माष्टुमर्हति तदेव विवेकविद्युत् ॥ अपि च ॥ असकृद्धुपरमद्भिरङ्कभेदैर्नटगणनिःक्रमणाद्विविक्तरङ्गः । अविदितमुखसन्धि-रामुखान्तो निगमकवेस्तव रूपकप्रबन्धः ॥ किञ्च । न दहति सगरान्वयं न पादात्प्रभवति नाप्यलिकादुदेति चक्षुः । न च किमपि शृणोति नेत्रवर्गो मम कथमस्तु तव स्तवेऽधिकारः । नान्द्यन्ते सूत्रधारः ।

पुष्पिकावाक्यानि ।

" इति निष्क्रान्ताः सर्वे श्रवणसम्पत्तिर्नाम प्रथमोऽङ्कः ।
" " मननसिद्धिर्नाम द्वितीयोऽङ्कः ।
" " निदिध्यासनधर्मसम्पन्नाम तृतीयोऽङ्कः ।
" " तुरीयोयमात्मदर्शननामाङ्कः
" " अपवर्गप्रतिष्ठानाम पञ्चमोऽङ्कः ।

इन्द्रविजयनाटकम् (चित्रकेतूपाख्यानोक्तम्) ने. भा. स.

क्रमाङ्कः प्र. ३६५ विषयाङ्कः १२

ग्रन्थकारः– जयरणजितमल्लः । नेपालीयं कागतम् । नेवारी लिपिः । पङ्क्तयः ८ । आकारः १०$\frac{3}{8}$×४ । ग्रन्थसंख्या २४०० । पत्रसंख्या १५१ । समयः ८७१ ।

आदिवाक्यम् ।

श्री ३ नृत्यनाथाय नमः । आदौ नान्दीश्लोकः । सानन्दं स्मेरवक्त्रः शशधरवदनः कुन्दशङ्खेन्दुगौरो नागेन्द्रावद्धचूडः सुरनगरनदीं मौलिदेशे दधानः । वामाङ्गे शैलपुत्रीं रविशशिहुतभुग्लोचनो विश्ववन्द्यः सृष्टिस्थित्यन्तकर्ता मदभयशमनः पातु वो नृत्यनाथः । ततो नान्दीगीतम् ॥ जय जय शङ्करमा । श्रीमाल्लव । ज. ए. थ. चो. रूज ॥ भवभय । विभूति भूषित तनुडोहें सुरेश चाँद तिलक अभिरामा । भवभय नाशक देव महेश सुर सरि शिर वहकर मृगवाल विभूतिभूषित तनुडोहेसुरेश । चाँदतिलक अभिरामा जगत अपार । जयजगदीश नटेश ॥ध्रु॥

पुष्पिकावाक्यानि ।

इति प्रथमोऽङ्कः ।
" द्वितीयोऽङ्कः ।
" तृतीयोऽङ्कः ।
" चतुर्थोऽङ्कः ।
" पञ्चमोऽङ्कः ।

इति षष्ठोऽङ्कः ।
" सप्तमोऽङ्कः ।
" अष्टमोऽङ्कः ।
" नवमोऽङ्कः ।
" दशमोऽङ्कः ।

इति एकादशोऽङ्कः ।
" द्वादशोऽङ्कः ।
" त्रयोदशोऽङ्कः ।
" चतुर्दशोऽङ्कः ।
" पञ्चदशोऽङ्कः ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अन्तिमवाक्यम्—

आरति ॥ पञ्चम ॥ चो ॥ ईभव अथिरेत्यादि ॥ मेपु १५ ॥ ॥ इति श्री श्राजय रणजित्मल्लदेवविरचिते चित्रकेत्वाद्युपाख्यानेन्द्रविजयनामनाटके पञ्चदशोऽङ्कस्समाप्तः ॥ शुभ ॥ ॥ संवत् ८७१ फाल्गुणशुदि ८ घटि धुनका ॥ ॥ सं. ८८४ आश्विनवदि ४ लिखिति मनिराम ॥ ॥ शुभमस्तु सर्वदा ।

उत्तररामचरितनाटकम्

क्रमाङ्कः प्र. ३४४ विषयाङ्कः १३

ग्रन्थकारः–भवभूतिः । ताडपत्राणि । नेवारी लिपिः । पङ्क्तयः ९ । आकारः १२×२$\frac{३}{४}$ । ग्रन्थसंख्या ६०० । पत्रसंख्या ३६ । समयः ३१६ । पूर्णम् ।

आदिवाक्यम्—

ॐ नमो वासुदेवाय ॥ इदं कविभ्यः पूर्वेभ्योः नमोवाकं प्रशास्महे । वन्दे महिबतां वाचममृतामात्मनः कलाम् ॥ नान्यन्ते सूत्रधारः । अलमतिविस्तरेण । अद्य खलु भगवतः कालप्रियनाथस्य यात्रायामार्यमिश्रान्विज्ञापयामि । एवमत्र भवन्तो विदांकुर्व्वन्तु । अस्ति तत्र भवान्काश्यपः श्रीकण्ठपदलाञ्छनो भवभूतिर्नाम ॥ यं ब्राह्मणमियं देबी बाग्वश्येवान्वबर्त्तत । उत्तरं रामचरितं तत्प्रणीतं प्रयोज्यते ॥ एषोऽस्मि कविवशादायोध्यकस्तदानीन्तनश्च सम्वृत्तः । समन्ततोऽवलोक्य । भोभो यदा तावदत्र भवतः पौलस्त्यकेतोर्महाराजस्यायमभिषेकसमयो रात्रिन्दिवमसंहृतानन्दनान्दीकस्तत्किमिति विश्रान्तचारणानि चत्वरस्थानानि ॥

पुष्पिका—

इति निष्क्रान्तो प्रथमोऽङ्कः समाप्तः ।

,, द्वितीयोऽङ्कः समाप्तः ।

इति सर्वे निष्क्रान्तास्तृतीयोऽङ्कः समाप्तः ।

इति निष्क्रान्ताः सर्व्वे चतुर्थोऽङ्कः समाप्तः ।

इति सर्व्वे निष्क्रान्ताः पञ्चमोऽङ्कः समाप्तः ।

इति निष्क्रान्ताः सर्वे षष्ठोऽङ्कः समाप्तः ।

इति परिक्रम्यनिष्क्रान्ताः सर्व्वे सप्तमोऽङ्कः समाप्तः ।

उत्तररामचरीतनाटकम्

क्रमाङ्कः प्र. ३३२ विषयाङ्कः १४

ग्रन्थकारः भवभूतिः । ताडपत्राणि । मैथिली लिपिः । पङ्क्तयः ५ । आकारः १३×१$\frac{७}{८}$ । ग्रन्थसंख्या १६०० । पत्रसंख्या ६५ । समयः शकाब्दा १३९९ । मध्यखण्डितम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

आदिवाक्यम्—

ॐ नमो वयं शैलसुतापदाम्बुजम् ॥ इदं गुरुभ्यः पूर्वेभ्यो नमोवाक्यं प्रशास्महे । विन्देम देवतां वाचममृतामात्मनः कलाम् ॥ नान्द्यन्ते सूत्रधारः ॥ अलमति विस्तरेण………… प्रियनाथस्य भगवतो यात्रायामार्य्यमिश्रान् विज्ञापयामि । एवमत्र भवन्तो विदांकुर्वन्तु अस्ति तत्र भगवान् काश्यपः श्रीकण्ठपदलाञ्छनो भवभूतिर्न्नाम । यं ब्राह्मण मियन्देवी वाग्वश्येवानुवर्त्तते । उत्तरं रामचरितं तत्प्रणीतं प्रयोज्यते । एषोऽस्मि कविवशादायोध्यस्तदानीन्तनश्च संवृत्तः समन्ततोवलोक्य भो भो यदा तावदत्र भगवतःपौलस्त्यकुलकेतोर्म्महाराजस्यायमभिषेकसमयो रात्रिन्दिवा संहतानन्दनान्दीकः तत्किमिति विश्रान्तचारणानि ।

पुष्पिका—

इति निष्क्रान्तौ प्रथमोऽङ्कः ।

इति निष्क्रान्तौ द्वितीयोऽङ्कः ।

इति निष्क्रान्ताः सर्वेच्छाया रामाभिधानो नाम तृतीयोऽङ्कः ।

इति निष्क्रान्ताः सर्वे चतुर्थोऽङ्कः ।

इति निष्क्रान्ताः सर्वेचन्द्रकेतुलवातरणो नाम पञ्चमोऽङ्कः ।

इति सकरुणाकुलं परिक्रम्य निष्क्रान्ताः सर्वे षष्ठोङ्कः ।

अन्तिमवाक्यम्—

तामेतां परिभावयन्त्वभिनये विन्यस्तरूपां बुधाः शब्दब्रह्मविदः कवेः परिणतप्रज्ञस्य वाणीमिमाम् ॥ इति निष्क्रान्ताः सर्व्वे ॥ इत्युत्तरचरिते सप्तमोङ्कः समाप्तः ॥ ॥ शुभमस्तु

उत्तररामचरितनाटकम्

क्रमाङ्कः प्र. १५३७ विषयाङ्कः १५

ग्रन्थकारः—भवभूतिः । ताडपत्राणि । प्राचीनदेवनागरी लिपिः । पङ्क्तयः ५ । आकारः १२×२$\frac{१}{८}$ । ग्रन्थसंख्या १००० । पत्रसंख्या ५७। मध्यखण्डितम् ।

उषाहरणनाटकम् (ने. भा. मयम्)

क्रमाङ्कः प्र. ३६५ विषयाङ्कः १६

ग्रन्थकारः— जयरणजितमल्लदेवः । नेपालीयं कागतम् । नेवारी लिपिः । आकारः ९×३$\frac{६}{८}$ । पङ्क्तयः ७ । ग्रन्थसंख्या १४०० । पत्रसंख्या १०५ ।

आदिवाक्यम्—

श्री ३ नृत्यनाथाय नमः ॥ ॥ "आदौ नान्दी श्लोकः ॥ सानन्दं घनसारकुन्दधवलो नागेन्द्र हारो हरश्चन्द्रार्द्धाङ्कितशेखरो गिरिजया॥बामाङ्गसंशोभितः । शूलीभूतिविलेपित-

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्त्रिनयनो गङ्गाधरस्सादरं दैत्यारण्यदवानलस्स्फुरन्नुतो नृत्येश्वरः पातु वः ॥ ॥ ततो नान्दीगीतम् ॥ ॥ जय जय शङ्करमा ॥

पुष्पिका—

इति प्रथमोऽङ्कः। इति पञ्चमोऽङ्कः

इति द्वितीयोऽङ्कः। इति षष्ठोऽङ्कः।

इति तृतीयोऽङ्कः। इति सप्तमोऽङ्कः।

इति चतुर्थोऽङ्कः। इत्यष्टमोऽङ्कः।

इति श्रीश्रीजयरणजिन्मल्लदेवमहाराजाधिराजविरचिते उषाहरणनामनाटके नवमोऽङ्क समाप्तः ॥ ॥शुभमस्तु ॥ ॥

समयः— सं. ८७४ आषाढ शुदि ८ श्व घटि धुनका ॥ ॥ शुभः।

उषाहरणनाटकम् (नेवारभाषामयम्)

क्रमाङ्कः प्र. ११३२ विषयाङ्कः १७

ग्रन्थकारः– जयभूपतीन्द्रमल्लः। नेपालीयं कागतम्। नेवारी लिपिः। पङ्क्तयः १०। आकारः ११$\frac{3}{4}$×६ ग्रन्थसंख्या १४४०। पत्रसंख्या ८१। समयः ८३३। पूर्णम्

आदिवाक्यम्।

श्री अर्द्धनारीनृत्यश्वराभ्यां नमः। आदौ नान्दीश्लोकः।

सानन्दं कैरवेन्दुप्रकरहिमसुधाहीरहिण्डीरगौरः कान्तासंयुक्तदेहः सुरवरसहितः सादरं देवदेवः। भोगीन्द्राबद्धचूडस्तुहीनकरकलाशेखरो भव्यमूर्तिर्मौलौ यस्यास्ति गङ्गास दिशतु जगतां मङ्गलं नृत्यनाथः। ततो नान्दीगीतम्।

पुष्पिकावाक्यानि।

इति श्रीश्रीजयभूपतीन्द्रमल्लदेवविरचित उषाहरणनाटके प्रथमोऽङ्कः।

" " द्वितीयोऽङ्कः।

" " तृतीयोऽङ्कः।

" " चतुर्थोऽङ्कः।

" " पञ्चमोऽङ्कः।

" " षष्ठोऽङ्कः।

" " सप्तमोऽङ्कः।

अन्त्यवाक्यम्—

श्रीश्रीजयभूपतीन्द्रमल्लदेव सनाथराजकुमार श्रीश्रीजयरणजितमल्लदेव यात इहि यात उषाहरण सप्तमाऽङ्कः प्याखन याता दप कँस विज्याङाया घन्ति दयकाव चोस्य तस्य विज्याङा। सं. ८३३ कार्तिक वदि १ शुभम्।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

उषाहरणनाटकम्

क्रमाङ्कः प्र. १५६४ विषयाङ्कः १८

ग्रन्थकारः– श्रीजयजगत्प्रकाशमल्लः। नेपालीयं कागतम्। नेवारी लिपिः। पङ्क्तयः ७। आकारः ११$\frac{5}{8}$×३$\frac{3}{8}$। ग्रन्थसंख्या ७००। पत्रसंख्या ५०। पूर्णम्।

कर्पूरमञ्जरीसट्टकम्

क्रमाङ्कः प्र. १२६१ विषयाङ्कः १६

ग्रन्थकारः-राजशेखरः। ताडपत्राणि। मैथिली लिपिः। पङ्क्तयः ५। आकारः ११$\frac{7}{8}$×१$\frac{5}{8}$। ग्रन्थसंख्या ५४०। पत्रसंख्या ३६। समयः लक्ष्मणसंवत् ३५८। पूर्णम्।

आदिवाक्यम्–

ॐनमः शिवाय। भद्दं भोदु सरस्सईअ कइणो नन्दन्तु वासाइणो अण्णाणं पि तहा पअट्टदु वरा बाणी च्छइल्लप्पिआ। वच्छोही तह माअधी फुरदु णो सा किञ्च पञ्चालिआ रीदीओ विलिहंतु कव्वकुशला जोण्हं चओरा विअ॥ अवि अ॥ अकलिअपरिरम्भविब्भमाइं अगणि-अचुम्बनडम्बराइं दूरं। अघडिअघणतालनाइं निच्चं णमह अणङ्गरईण मोहणाइं॥

अन्त्यवाक्यम्—

विदू० भो वअस्स पज्जलिदो अवहोदिज्जन्तु भामरीओलाजञ्जलिमोक्खो विकरीअदु। राजा तथा नाटयति, तथा राजा विवाहं निर्वत्य सोत्साहं यथार्हमभ्यर्च्य विसृज्य च सर्वा लतया सह क्रीडाया मालाञ्चक्रे॥ इति निष्क्रान्ताः सर्वे॥ कइराअराअसेहरविरइदे कप्पूरमञ्जरी-सट्टए चउट्ठ जमणिअन्तरं समत्तं॥ ॥ शुभमस्तु॥ श्रीरस्तु॥

कर्पूरमञ्जरीसट्टकम्

क्रमाङ्कः प्र. १४४६ विषयाङ्कः २०

ग्रन्थकारः–राजशेखरः। मध्यदेशीयं कागतम्। देवनागरी लिपिः। पङ्क्तयः १०। आकारः १०$\frac{5}{8}$×४$\frac{1}{2}$। ग्रन्थसंख्या १८०। पत्रसंख्या १३। अपूर्णम्।

कर्पूरमञ्जरीसट्टकम्

क्रमाङ्कः प्र. १४४६ विषयाङ्कः २१

ग्रन्थकारः-राजशेखरः। मध्यदेशीयं कागतम्। देवनागरी लिपिः। पङ्क्तयः ७। आकारः १०$\frac{3}{4}$×३$\frac{3}{8}$। ग्रन्थसंख्या ५००। पत्रसंख्या ३४। मध्येखण्डितम्।

कर्पूरमञ्जरीसट्टकम

क्रमाङ्कः तृ. ४०४ विषयाङ्कः २२

ग्रन्थकारः– राजशेखरः। ताडपत्राणि। मैथिली लिपिः। पङ्क्तयः ५। आकारः १/×१$\frac{7}{8}$। ग्रन्थसंख्या ७००। पत्रसंख्या ३५। समयः लक्ष्मणसंवत् ५०१।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कस्यचिन्नाटकस्य प्रकीर्णपत्राणि

क्रमाङ्कः तृ. ११६। विषयाङ्कः २३

ग्रन्थकारः ...... । नेपालीयं कागतम् । नेवारी लिपिः। पङ्क्तयः ६ । आकारः ६×५। ग्रन्थसंख्या १०० । पत्रसंख्या १७ ।

कालीयमथनोपाख्याननाटकम् (नेवारभाषायुतम्)

क्रमाङ्कः प्र. ४६० विषयाङ्कः २४

ग्रन्थकारः– सुमतिजयजितामित्रमल्लदेवः। नेपालीयं कागतम् । नेवारी लिपिः । पङ्क्तयः ६ । आकारः ८$\frac{3}{4}$×३$\frac{3}{8}$। ग्रन्थसंख्या ५०० । पत्रसंख्या ४५ ।

आदिवाक्यम्–

ॐनमः श्रीतारेश्वराय ॥ कल्यान (ण) ॥ चो ॥ भावहु शङ्कर गौरिअरधङ्गा ॥ध्रू०॥ भवभयहर हर धरजपमाला काननकुण्डलि गलमुण्डमाला ॥ चन्द्रतिलक शिरगङ्गभुजङ्गा पिङ्गलजट नट हनअनङ्गा ॥ पञ्चवदन नटवर दिगवसना मङ्गलघट भज गिरिवरशयना ॥ कहय कविवर जितामित्रदेवा छोडु सकल धंध करु शिवसेवा ।

पुष्पिका :–

इति नेपालमहीमण्डलमहीपतिमुकुटमणिश्रीश्रीसुमतिजयजितामित्रमल्लविरचिते काली-(य)मथनोपाख्याननाटके प्रथमाङ्कं संपूर्णम् ।

इति श्रीमहाराजाधिराजश्रीश्रीजयजितामित्रमल्लविरचिते काली(य)मथनोपाख्याननाम-नाटके द्वितीयाङ्कं संपूर्णम् ।

इति नेपालमहीमण्डलमहीपतिश्रीश्रीसुमतिजयजितामित्रविरचित्ते काली(य)मथनोपाख्याननाटके तृतीयाङ्कम् ।

समयः ने. सं. ८०४ माघ शुदि १५ ।

कुञ्जविहारनाटकम् (भाषापञ्जिकासहितम्)

क्रमाङ्कः प्र. ४६१ विषयाङ्कः २५

ग्रन्थकारः– जगज्ज्योतिर्मल्लदेवः । ताडपत्राणि । नेवारी लिपिः । पङ्क्तयः ५। आकारः १२$\frac{1}{8}$×२$\frac{1}{8}$ । ग्रन्थसंख्या १५० । पत्रसंख्या १२ ।

आदिवाक्यम्:–

ॐनमस्तस्यै ॥ श्रीगुरुभ्योनमः ॥ परदेवताय नमः ॥ आवरणाद्ध नारीनृत्यानन्दस्वरूपेभ्यो नमः ॥ श्रीकुञ्जविहारनामनाटकं लिख्यते ॥ प्रथमं नान्दीगीतं ॥ राजविजय ॥ जति ॥ अनल सुरुज शशि तिनिहु नयने जत अभिमत देअ पाचहु वदने ।। वराभयशूलहाथ डमरू वजावे

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ताहि शिव परसादे सव सुख पावे ॥ गजानना षडानन सुत दुहु सङ्ग मङ्गलदायक रूप अज्ञत्र; तरङ्गे ॥ चाँद गङ्गा तनु तिनु धवल प्रगासे नृप जगजोति मन तुअ पद आसे ॥१॥ सूत्रधार प्रवेशगीतम् ॥ मालव ॥ अस्तारा ॥ विभूतिभूषण भव फणिमयहारे चरमवसन शिर सुर-सरिधारे ॥ तिलक अमिअकर गरल अहारे मदनदहन हर संसारकंसारे ॥ त्रिशूलडमरू कर वसहपर्याने तुमार सरूप शिव केओनहि जाने ॥ कहे नृप जगजोति सुन शशिभाले राग मालव गावए एह्रो अठताले ॥२॥ सूत्र निस्सारगीत ॥ आसावरी ॥ प्र ॥ कुञ्जविहार हरिच्छाज रे गोपीसवे हरखति आज रे ॥३॥

अन्तिमं वाक्यम्–

माया पास पसार देखि कहु दिने दिने उपजु तरास गुरुगमे बुझि नृपति जगजोतिमल्ल शिवक भगति पए आसु ॥ लु ५ ॥

पुष्पिका– इति कुञ्जविहारनामनाटकं सपूर्णम् ॥

कुन्दमाला

क्रमाङ्कः प्र. १११४ विषयाङ्कः २६

ग्रन्थकारः-धीरनागः । ताडपत्राणि । देवनागरी लिपिः । पङ्क्तयः ५ । आकारः १२$\frac{3}{8}$×२$\frac{3}{8}$ ग्रन्थसंख्या २०६ । पत्राङ्काः ५०-६० । पत्रसंख्या ११ । समयः नेसं ५५१ ।

आदिवाक्यम् ।

ॐनमो नाट्येश्वराय । ज्वालेवोर्द्ध विसर्प्पिणी परिणतस्यान्तस्तपस्तेजसोगङ्गातोयतरङ्ग-सर्प्पवसतिर्व्वल्मीकलक्ष्मीरिव ।सन्ध्येवार्द्र मृणालकोमलतनोरिन्दोःसहस्थायिनी पायाद्वस्त रुणारुणांशुकपिशा शम्भोर्जटासंहतिः ।।नान्द्यन्ते सूत्रधारः ॥

अन्त्यवाक्यम्–

अपिच । कौशल्यापादशुश्रूषास्सौख्यं वृद्धासु लप्स्यसे । पश्य सख्यो भगिन्यश्च तथैव मुनिकन्यकाः ।

इति निष्क्रान्तौ । इतिकुन्दमालाङ्को नाम संदर्भः समाप्तः ।

कृष्णकैलासयात्रोपाख्याननाटकम्

क्रमाङ्कः तृ. ११६ विषयाङ्कः २७

ग्रन्थकारः–जयरणजितमल्लदेवः । नेपालीयं कागतम् । नेवारी लिपिः । पङ्क्तयः ६ । आकारः ९×५। ग्रन्थसंख्या १००० । पत्रसंख्या ७० । समयः ने. सं. ८६७ ।

आदिवाक्यम्—

श्रीअर्द्धनारीश्वराभ्यां नमः । आदौनान्दीश्लोकः । सानन्दं वृषभध्वजो नगसुता वामाङ्ग-संशोभिता भर्गः पन्नगहारभूषितगलस्त्रैलोक्यरक्षाकरः । चन्द्रार्द्धाङ्कितशेखरःसुरमुनिध्याने-कगम्यो मुदा त्र्यक्षो हिण्डीरवर्णोदिविषदनमितः पातु वोनृत्यनाथः । ततो नान्दीगीतम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पुष्पिकावाक्यानि—

इतिप्रथमोऽङ्कः। इतिद्वितीयोऽङ्कः। इतितृतीयोऽङ्कः।

इतिचतुर्थोऽङ्कः। इतिपञ्चमोऽङ्कः। इतिषष्ठोऽङ्कः।

इति श्रीमत्पशुपतिचरणकमलेत्यादि श्रीश्रीजयरणजितमल्लदेवविरचिते कृष्णकैलास-यात्रोपाख्याननामनाटके सप्तमोऽङ्कः समाप्तः॥ शुभम्॥ सं. ८६७ मार्ग वदि ६।

कृष्णचरित्रनाटकम्

क्रमाङ्कः प्र. ३६० विषयाङ्कः २८

ग्रन्थकारः- नेपालीयं कागतम्। मेवारी लिपिः। पङ्क्तयः ६। आकारः ११×२३/४। ग्रन्थसंख्या १८०। पत्रसंख्या ६।

आदिवाक्यम्—

ॐनमो नृत्यनाथाय॥ मल्लाल॥ चो॥ सुरसरिजरे अभिषेक सविवि कय आधसुधाकर तिलककरे, तनु अनुरूप विभूतिभूषण जनउवनोनुव भुजगवले॥ अति सुन्दरे २ त्रिभुवन नाह विवाह करे॥ ध्रु०॥ निगम अमिय्र पूरित चतुरानन संमुख मङ्गलकलश धरे नारायण सुरगण मुनिजन सह सहसबदन सुभ शवद करे॥

पुष्पिका:-

इतिप्रथमोऽङ्कः।

अन्त्यवाक्यम्—

पुष्कर नर राजायाके वङ॥कोराव॥ चो॥ भाविनि गेरतुवमावलाय मनमोरा रत र कतहु नहि जाय॥ आज देखल तुव वदन सरोज तहि खनेस ओ तनुता। अतःपरं खण्डितम्।

कृष्णचरित्रनाटकम्, नेवारभाषायुतम्

क्रमाङ्कः प्र ३३८ विषयाङ्कः २६

ग्रन्थकारः-जयरणजितमल्लदेवः। नेपालीयं कागतम्। नेवारी लिपिः। पङ्क्तयः ८। आकारः १०१/२×४१/२। ग्रन्थसंख्या २२००। पत्रसंख्या १३२। ११ अङ्कान्तं पूर्णम्।

आदिवाक्यम्—

श्री ३ अर्द्धनारीश्वराभ्यां नमः॥ ॥नान्दिश्लोकः॥ सानन्दं चन्द्रमौलिस्सुरगण-महितः कुन्दकर्प्पूरगौरः स्टेरास्यो लास्ययुक्तो गिरिवरतनयाश्लिष्टदेहो विलासी। कन्दर्प्पोद्दर्प्पहारी फणिमणिविलसच्चारुभूषाभिरामो भक्तानां कल्पशाखी भव-भयशमनः पातु नृत्येश्वरो वः॥ ॥नान्दिमे॥ कामोद॥ चो॥ जय जगपालक

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अमरअधीश । सुरगणवन्दित नटवर ईश । नगपतिनन्दिनि विलसति रंगे, सुरसिग शिरपर भोजन भंगे ॥ जय जगदीश नटेश ॥ध्रु०॥

पुष्पिकाः—

इतिप्रथमोऽङ्कः ।	इत्यष्टमोऽङ्कः ।
इतिद्वितीयोऽङ्कः ।	इतिनवमोऽङ्कः ।
इतितृतीयोऽङ्कः ।	इतिदशमोऽङ्कः ।
इतिचतुर्थोऽङ्कऽ ।	इत्येकादशोऽङ्कः ।
इतिपञ्चमोऽङ्क ।	इतिद्वादशोऽङ्कः ।
इतिषष्ठोऽङ्कः ।	इतित्रयोदशोऽङ्कः ।
इतिसप्तमोऽङ्कः ।	इतिचतुर्दशोऽङ्कः ।

अन्तिमवाक्यम्ः—

आशीर्वादश्लोकः ॥ यावत्स्वर्गतरङ्गिणीहरजटाजूटाग्रसंशोभिनी यावत्काञ्चन-पर्वतो हिमगिरिर्य्यावच्च वारान्निधिः । तावत्सूर्य्यकुलारविन्दतरणिर्गाम्भीर्य्यशौर्यान्वितो भूपः श्रीरणजित्नृपालमहितो भूमिं सदा रक्षतु ॥ ॥ श्री जयरणजितमल्लमहाराजा-धिराजस्य सप्ताङ्गराज्यवृद्धिरस्तु ॥ सर्व्वे तथास्तु ॥ ॥आरतिमे ॥ पञ्चम ॥ चो ॥ ईभव अथिरेत्यादि ॥ मेपु १५ ॥ ॥ इति श्रीश्री जयरणजितमल्लमहाराज-विरचिते कृष्णचरित्रनामनाटके पञ्चदशोऽङ्कस्संपूर्णः ॥ ॥

समयः संवत्-८५८ फाल्गुण शुदि १ बुधवार संपूर्ण याङा दिन शुभ ।

कृष्णचरित्रोपाख्यानम् नेवारभाषामयम्

क्रमाङ्कः प्र. ३६५ । विषयाङ्कः ३०

ग्रन्थकारः—जयरणजितमल्लदेवः । नेपालीयं कागतम् । नेवारी लिपिः । पङ्क्तयः ८ । आकारः १०$\frac{1}{2}$×४ । ग्रन्थसंख्या २०० । पत्रसंख्या ११ ।

आदिवाक्यम्—

श्री ३ नृत्यनाथाय नमः ॥ ॥ नान्दिमे ॥ कामोद ॥ चो ॥ जय २ चन्द्रशेषर नटेश ॥ध०॥ देवि अरधंग ओस शिर गंग रणजित ल्हाल शुभ याय माल नंग ॥

पुष्पिकाः—

इति श्रीश्री जयरणजितमल्लदेवविरचिते कृष्णचरित्रनाटकेप्रथमोऽङ्कस्समाप्तः ॥ ॥ शुभमस्तु सर्वदा ॥ ॥ शुभम् ॥

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

[६१]

कोलासुरवधोपाख्यानम्, नेवारभाषायुतम्

क्रमाङ्कः प्र. ३६५ विषयाङ्कः ३१

ग्रन्थकारः—जयरणजित्मल्लदेवः। नेपालीयं कागतम्। नेवारी लिपिः। पङ्क्तयः ८। आकारः ६×३५/८। ग्रन्थसंख्या ११००। पत्रसंख्या ८०।

आदिवाक्यम्ः—

श्री ३ नृत्यनाथाय नमः॥ आदौ नान्दिश्लोकः॥ सानन्दं चन्द्रमौलिस्सुरगणसहितः सर्प्पराजोपवीतिः स्मेरास्यश्चारुवक्त्रस्सुररिपुदमनो व्याघ्रचर्म्मोत्तरीयः। कर्प्पूरस्तोमगौरो मुनिवरनमितः शूलभृल्लास्ययुक्तः कन्दर्प्पप्राणहारी, त्रिनयनविलसत्पातु वो नृत्यनाथः॥ ॥ ततो नान्दीगीतम्॥

पुष्पिकाः—

इतिप्रथमोऽङ्कः। इतितृतीयोऽङ्कः। इतिपञ्चमोऽङ्कः।
इतिद्वितीयोऽङ्कः। इतिचतुर्थोऽङ्कः। इतिषष्ठोऽङ्कः।

इति श्रीश्रीजयरणजित्मल्लदेवमहाराजाधिराजविरचिते कोलासुरवधोपाख्याननामनाटके सप्तमोऽङ्कः समाप्तः॥ ॥ शुभमस्तु॥

समयः—सं. ८८६ ज्येष्ठ शुदि ३ शुभम्॥ ॥ मेवु ९९ थिक॥ ॥ लु ६१ थिक॥ ॥ ॥ ॥ ॥

कोलासुरवधोपाख्याननाटकम्, नेवारभाषायुतम्

क्रमाङ्कः प्र. ३३१ विषयाङ्कः ३२

ग्रन्थकारः···। नेपालीयं कागतम्। नेवारी लिपिः। पङ्क्तयः ८। आकारः। १२३/४×३५/८। ग्रन्थसंख्या १४००। पत्रसंख्या ८५। पूर्णम्।

आदिवाक्यम्ः—

श्री ३ नाट्येश्वराय नमः॥ ॥ नान्दीश्लोक॥ रङ्गप्राङ्गणचण्डताण्डवपटुः प्रत्यूहसंघं मुहुर्निघ्नन् विश्वहिते रतो गिरिसुतादेहार्द्धभाक् सर्व्वदः। ताराधीश्वरखण्डभव्यतिलकः कर्प्पूरकुन्दप्रभः स्फूर्ज्जत्पन्नगहारकङ्कणकरो नृत्येश्वरः पातु वः॥ ॥ शून्यमे॥ हरिकमलासनमा॥ नान्दि माल्लव॥ ज ए. प. अ. रू. प्र. प.॥ हर गिरिजा पति, कुन्दपुञ्जसित शिरवहे निरमलगङ्गा रजनिरमनदलमौलिविभूषित देविकलित

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अरधंगा ॥ विधिकमलापतिदेव दिनपति करमपदयुगसेबा भकतकलपतरु देवनिरञ्जन तुअसदृश नहि देवा॥

पुष्पिका:—

इतिप्रथमोऽङ्कः समाप्तः । इतिचतुर्थोऽङ्कः समाप्तः ।
इतिद्वितीयोऽङ्कः समाप्तः । इतिपञ्चमोऽङ्क समाप्तः।
इतितृतीयोऽङ्क समाप्तः । इतिषष्ठोऽङ्कः समाप्त ।

अन्तिमवाक्यम्:—

भूपतीन्द्रनृप निजमति एहो भनइ मोर सकल विचारे देवि जननि पदपंकजभजलहु, तेबि निखिल परिवारे ॥ मेपु ११८॥ लु ६० ॥ ॥

इति श्रीमहालक्ष्मीमाहात्म्यकोलासुरवधोपाख्याननामनाटकः समाप्तः ॥

कंसवध(कृष्णचरित्र)नाटकम्

क्रमाङ्कः प्र. १३६२ विषयाङ्कः ३३

ग्रन्थकारः—जयभूपतीन्द्रमल्लः । नेपालीयं कागतम् । नेवारीलिपिः । पङ्क्तयः ८ । आकारः १७×४½ । ग्रन्थसंख्या २००० । पत्रसंख्या ५६ । प्रकीर्णरूपम् ।

खट्वासुरवधोपाख्यानम् नेवारभाषायुतम्

क्रमाङ्कः प्र. ३६५ विषयाङ्कः ३४

ग्रन्थकारः-जयरणजितमल्लदेवः । नेपालीयं कागतम् । नेवारी लिपिः । पङ्क्तयः ८ । आकारः ९×४ । ग्रन्थसंख्या ४०० । पत्रसंख्या २५ । ३ अङ्कात्मकम् मध्यैकपत्रखण्डितम् ।

आदिवाक्यम्—

श्री ३ नृत्यनाथायनमः ॥ ॥ खिसन् ॥ ॥ आदौ नान्दीश्लोकः ॥ सानन्दं हिमकुन्दकैरवसुधाहिण्डीरपिण्डच्छविस्तारानायकशेखरो गिरिसुतावामाङ्गसंशोभितः । शूली पन्नगहारकङ्कणकरो गङ्गाधरः कामजी, भर्गो भूतिविलेपितः स्मितमुखो नृत्येश्वरः पातु वः ॥ ॥ ततोनान्दीगीतम् ॥

पुष्पिका:—

इतिप्रथमोऽङ्कः इतिद्वितीयोऽङ्कः

इति श्रीश्रीजयरणजित्मल्लदेवमहाराजाधिराजविरचिते खट्वासुरवधोपाख्याननामनाटके तृतीयोऽङ्कस्समाप्तः ॥

समयः—सं. ८८७ आश्विनकृष्ण एकादशी कुन्हु धुनका शुभम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

गीतदिगम्बरनाटकम्

क्रमाङ्कः प्र. ३८२। विषयाङ्कः ३५।

ग्रन्थकारः—वंशमणिः। ताडपत्राणि। मैथिलीं लिपिः। पङ्क्तयः ४। आकारः १२×१३/४।
ग्रन्थसंख्या ७५०। पत्रसंख्या ४४। समयः शाके सं १५७२। पूर्णम्।

गीतदिगम्बरनाटकम्

क्रमाङ्कः प्र. ३८२ विषयाङ्कः ३६

ग्रन्थकारः—वंशमणिः। ताडपत्राणि। मैथिली लिपिः। पङ्क्तयः ७। आकारः १५×२।
ग्रन्थसंख्या ७५०। पत्रसंख्या ३७।

आदिवाक्यम्ः—

ॐ नमस्तस्यै। चिन्ताकामकलाकलापविषये भोगाय योगासनं जातेयं जपमालिकापि करयोः शृङ्गारहारो मम। पार्व्वत्याष्प्रथमे समागमविधावित्यस्तु वः संस्तुवन्प-श्चेषोरिषुपौरुषाणि जगतामादिर्म्मुदे पूरुषः॥ अपिच॥ वृद्धोयं विधिरद्य तत्पितृगृ-हावासे मनो माकृथास्त्वं कश्चित्पुरुषोत्तमं वृणु सभां मा पश्य नाकौकसाम्॥ इत्थं जल्पति वाक्छलेन जलधौ देव्याः श्रियः पातु वो लज्जामन्दभरान्मुरारिवपुषि श्रान्ता दृगन्ता-वलिः॥ अपिच॥ जयति जगदेकजननी विबुधगणानन्दकारिणी जयति। अमृतांशुमौलिमानसविलासहंसी चिरञ्जयति॥ आधमौलि मण्डन फलमाले आध त-रङ्गित सुरसरि धारे। आधाअलिक तिलक नव इन्दू आधसोहाञ्जन सिन्दूरविन्दू। कोमल विकटचरण दुहुचारी अपुरुषनाच करथि त्रिपुरारी। एक देह अधपुरुषदारा तेतिसकोटि देव देख निहारा। सुकवि वंशमणि एहु वसगारे सेवि देव हरकी नहि पावे॥ नन्द्यन्ते सूत्रधारः अलमतिविस्तरेण भो भोः कुशीलवाः तुषारपर्व्वतोत्यकानिकायकाननैकचमत्कार-चन्दनद्रुमस्य सरङ्गमङ्गलापाङ्गखञ्जरीटखेलाकश्मीरमण्डपाङ्गनस्य प्रणतसुरचक्रचूडा-मणिमरीचिमञ्जरीपिञ्जरितचरणनखकेसरस्य देवस्य भगवतो बालशशाङ्कशेखरस्य शशाङ्कवासरारचितो निश्शङ्कसाहसाङ्केन भूभृता समादिष्टाः स्मो यदेतस्य महामहस्य विलोकनोत्कण्ठया विविधविषयवासिनो महितमहिमानो विशारदाः शारदानुवृत्ति-वृत्तयो वर्त्तुलीभुतास्तदेषामनुरञ्जने भवताऽवहितेन भवितव्यमिति, प्रविश्य नटी अज्ज उत्त को एत्थ उवाओ, सूत्र० विचिन्त्य प्रिये अस्ति किल भरद्वाजकुलजन्मन जनकजन-पदीयेन रामचन्द्रशर्म्मणष्पुत्रेण वंशमणिकविनोपनिवद्धं गीतदिगम्बरं नाम रूपकमिति, नटी० णाह को रामचन्दो।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पुष्पिका:–

मुदितमहेशो नाम प्रथमोऽङ्कः ।

मानिनीमानभङ्गोनाम द्वितीयोऽङ्कः ।

विरक्तविरूपाक्षोनाम तृतीयोऽङ्कः ।

अन्तिमवाक्यम्–

राजा राज्यमकण्टकं प्रकुरुतां सर्वाङ्गसम्पत्तिमान् योगक्षेममपि क्षमं च लभतां सर्व्वोहि पौरौ जनः । सन्तः सन्तु निरन्तर सुकृतिनो देवीसमाराधनाद्भक्ति…तप तौभव… दिनं नः श्रेयसे भूयसे ।। महाः एवमस्त्वितिनिष्क्रान्ताः सर्व्वे ॥ सकामकामेश्वरो नाम चतुर्थोऽङ्कः ॥ ।। शुभमस्तु ॥ शाके १५७७ आषाढकृष्णपञ्चमी बुधे ।।

गोपीचन्द्रोपाख्याननाटकम् नेवारभाषायुतम्

क्रमाङ्कः प्र.३४५ विषयाङ्कः ३६

ग्रन्थकारः-जयभुपतीन्द्रमल्लदेवः । नेपालीयं कागतम् । नेवारी लिपिः । पङ्क्तयः ९ । आकारः ११$\frac{3}{8}$×४$\frac{1}{2}$ । ग्रन्थसंख्या १३०० । पत्रसंख्या ७५ । पूर्णम् ।

आदिवाक्यम्:—

ॐ नमोनृत्यनाथाय । अथ गोपीचन्द्रनाटकक्रमः । तत्र प्रथमं नान्दीश्लोकः । यस्याद्धाङ्गहरा हरीन्द्रतनया शीर्षे हरिद्दीपिनी । भाले सोमकला गले नरशिरोमाला शुभा राजते । प्रीत्या भूतगणैः समं नटगृहे चोत्सार्य विघ्नान्दशा नृत्यं स्ताण्डवडम्बरेण विधिना पायात्सदा नो हरः।। अथ नान्दीगीतम् । नन्दिर्भिरिङ्गिमा ॥ मालव जय अ. रु. थ. प्र. त्र. जय शङ्कर त्रिभुवननायक गौरि करिया अरधंगे डाढिया बाघेरिछाला भूषगहा डरि माला नाचित प्रमथ गण (नाथ),संग ॥ नन्दि भिरिङ्गि दूयि वाम दहित करि, साजिलो विकत सुवेण गङ्गा चान्द धरि विसधर गुनकरि वाधिलपित्तल वर वेशे भोरि भमिया जयतन करिला तवे मेदिनि डग मग कापो हाथ श्रव टो कटि पाद भूख (ष) ण सवे दह दिश गिपारहेसापे । अनुपम सुन्दर इरगुन (ण) वणन भूपतीन्द्रनृप गावे वासव हरि विधि नाजानोत्तमान गतिके भने भावे । मे. पु. ?

पुष्पिकावाक्यानि:—

इति श्री ३ स्वेष्टदेवताप्र(प्री)त्यै श्री २ जयभूपतीन्द्रमल्लकारितगोपीचन्दोपाख्याननाटके

प्रथमोऽङ्कः ।

द्वितीयोऽङ्कः ।

तृतीयोऽङ्कः ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इति श्रीमज्जयभूपतीन्द्रमल्लदेवकारिते गोपीचन्दोपाख्याननाटके चतुर्थोऽङ्कः ।

अन्तिमवाक्यम्—

काले सन्तु मुदा घना जलमुचः सत्कर्म्मिणो भूसुरा लोका धर्म्मपरायणा नयविदः शस्याधिका मेदिनी । देवाइन्द्र पुरोगमा जननुता ऋद्धचादिसौख्यप्रदाः श्रीमद्भूपतिवासवोऽस्तु सततं धर्म्मैः प्रजापालकः ।। श्री २ जयभूपतीन्द्रमल्लदेवसप्ताङ्गराज्यवृद्धिरस्तु ॥ सर्व्वे तथा तथास्तु ।। ।। आरती ।। पंचम ।। चो ।। इजगजलधि ।। मपु २७ ।। ।। लु ६ ।। इति श्री २ जयभूपतीन्द्रमल्लदेवकारिते गोपीचन्दोपाख्याननाटके पञ्चमोऽङ्कः समाप्तश्चायं ग्रन्थः ।। ।। शुभम् ।।

गोरक्षविजयनाटकम् (भाषा)

क्रमाङ्कः च. विषयाङ्कः ३७

ग्रन्थकारः- विद्यापतिसुतः । ताडपत्राणि । मैथिली लिपिः । पङ्क्तयः ५ । आकारः $१०\frac{३}{८}\times१\frac{५}{८}$ । ग्रन्थसंख्या १५० । पत्रसंख्या १२ । मध्यखण्डितम् ।

गोरक्षोपाख्यानम् नेवारीभाषामयम्

क्रमाङ्कः प्र. ३६५ विषयाङ्कः ३८

ग्रन्थकारः-जयरणजितमल्लदेवः । नेपालीयं कागतम् । नेवारी लिपिः । पङ्क्तयः ६ । आकारः $१०\frac{३}{८}\times४$ । ग्रन्थसंख्या ५०० । पत्रसंख्या २४ । पूर्णम् ।

आदिवाक्यम्—

श्री ३ नृत्यनाथाय नमः ।। नान्दिमे । विभूतिमा ॥ राजविजय ॥ चो । जय जय नृत्यमहेश्वर ।।धू०।। फणिमनिका खातल सो से च्यात भति, जट सितनिरमल ज्याथ मुदेश सति । हर गिरिनन्दिनि पिरिति रस उति करुणानदयति वाजे तरण घा विनति ।। मच्छेन्द्रनाथ गोरक्ष नाथ मीननाथ प्रवेश । फर्जिन्ह अर्वेमा ॥ चो ॥

पुष्पिकावाक्यानिः-

इति श्रीश्रीजयरणजितमल्लदेवमहाराजाधिराजविरचिते गोरषो(क्षो)पाख्यानकथा संपूर्ण प्रथमोऽङ्कः समाप्तः शुभमस्तुसर्वदा ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

गौरीविवाहनाटकम् (नेवारभाषायुतम्)

क्रमाङ्कः प्र. ३४७ विषयाङ्कः ३९

ग्रन्थकारः-जयभूपतीन्द्रमल्लदेवः। नेपालीयं कागतम्। नेवारा लिपिः। पङ्क्तयः १०। आकारः ११$\frac{१}{२}$×६$\frac{१}{२}$। ग्रन्थसंख्या २२००। पत्रसंख्या १००। समयः ने. सं. ८२७। १ तः ७ अङ्कान्तं पूर्णम्।

आदिवाक्यम्:-

श्री ३ गणेशायनमः॥ श्री ३ अर्द्धनारीनृत्येश्वराभ्यां नमः॥ ॥ आदौनान्दीश्लोकः॥ मौलौ चन्द्रार्द्धं मौले प्रवसति रुचिरा प्रेयसी काप्यपूर्वा, नान्या जानामि कान्ते कुवलयनयना प्रेयसी त्वं ममासि। आदर्शं पश्य तथ्यं वद कितव मुहुर्स्तर्जितो देवदेव्या, त्रस्तः पादानतोयं स्मितरुचिरमुखः पातु वो विश्वनाथः॥ ततो नान्दींगीतं ॥ राजविजय॥ प्र.ए.थ.अ.रु. प.ज. र.॥ जय जय शङ्कर रजनिरमणधर हरि विधि कर जसु सेवा॥ नागकलितकर ईश दिगम्बर वसन वघम्बर देवा॥ जयजगदीश नटेश ध्रु०॥

पुष्पिकावाक्यानि।

इति श्रीश्रीजयभूपतीन्द्रमल्लदेवविरचितगौरीविवाहनाटके प्रथमोऽङ्कः।

इति श्रीश्रीजयभूपतीन्द्रमल्लमहाराजाधिराजकृतगौरीविवाहनामनाटके द्वितीयोऽङ्कः समाप्तः।

इति तृतीयोऽङ्कः समाप्तः।

इति श्रीमत्रविकुलकमलविकशनकदिनकरभूमण्डलाखण्डलश्रीश्रीजयभूपतीन्द्रमल्लमहाराजाधिराजविरचितगौरीविवाहनाटके चतुर्थोऽङ्कः।

इति श्रीमत्यशःशशधरधवलीकृतधरामण्डलनेपालमहीमण्डलप्रचण्डमार्त्तण्डप्रतापदूरीकृतरिपुतिमिल(र)श्रीश्रीजयभूपतीन्द्रमल्लमहाराजाधिराजविरचितगौरीविवाहनाटके पञ्चमोऽङ्कः।

इति षष्ठोऽङ्कः।

इति श्रीमन्नेपालमहीमण्डलरमणश्रीश्री जयभूपतीन्द्रमल्लदेवविरचिते गौरीपरिणयाभिधान नाटके सप्तमोऽङ्कः।

समयः संवत् ८२६ फाल्गुणवदि १३ तया संवत् ८२७ फाल्गुणसुदि ६ व्याखनयाना श्वर लितयादिन॥

चतुरङ्कमहाभारतनाटकम्

विषयाङ्कः ४०

क्रमाङ्कः प्र. ४४९

ग्रन्थकारः-गजपतिः। नेपालीयं कागतम्। नेवारी लिपिः। पङ्क्तयः ६। आकारः ७$\frac{१}{२}$×३$\frac{१}{२}$ ग्रन्थसंख्या ३५०। पत्रसंख्या ३८।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

आदिवाक्यम्-

ॐनमो नाट्येश्वराय ॥ आकाशं श्वसनं कृशानुममृतं क्षोणीम्विभाव्य क्रमादीशानादिहरस्य पञ्चवदनं पञ्चात्मकं संस्थितम् ॥ पूर्व्वं यल्लपनञ्च पञ्चतनुतामाधाय पाण्डोः कुले लब्ध्वा जन्म युधिष्ठिरादिकमभून्नाम्नेहतत्पातु वः ॥

अन्त्यवाक्यम्-

शाल्द ॥ युवराज दुःशासन यथाज्ञापयति ॥ तदह किं भीरराजसकाशमेव गच्छामीति निष्क्रांन्तः ॥ दुर्योधनःसमाहूय ॥ देवि भानुमति महदत्ययान्मुक्तोऽहमतश्च महोत्साहं सम्पादयामहे ॥सर्वे॥ एवं सम्वादयामहे ॥ इति सर्वे तथैव निष्क्रान्ताः ॥ ॥ इति चतुरङ्कमहाभारतनाटिकायां शाल्वलप्रवेशो नाम प्रथमोऽङ्कः ॥ ॥ ततः प्रविशति शाल्वलः ॥ ...... ।

अतःपरं खण्डितम् ।

चन्द्राङ्गदोपाख्याननाटकम्

क्रमाङ्कः तृ. १६५ विषयाङ्कः ४१

ग्रन्थकारः-जयरणजितमल्लः । नेपालीयं कागतम् । नेवारी लिपिः । पङ्क्तयः ६ । आकारः ६×४$\frac{?}{?}$ । ग्रन्थसंख्या ४८ । पत्रसंख्या ४ समयः ८६५ । खण्डितम् । मूषिकदष्टम् ।

चारुदत्तनाटकम्

क्रमाङ्कः प्र. ११५२ विषयाङ्कः ४२

ग्रन्थकारः ... ... । ताडपत्राणि । नेवारी लिपिः । पङ्क्तयः ४ । आकारः ८$\frac{?}{?}$×१$\frac{?}{?}$ । ग्रन्थसंख्या ३५ । पत्रसंख्या ६ । खण्डितम् ।

जलशायिविष्णवादिसृष्ट्युपाख्यानम् नेवारभाषायुतम्

क्रमाङ्कः प्र. ३६५ विषयाङ्कः ४३

ग्रन्थकारः-जयरणजितमल्लदेवः । नेपालीयं कागतम् । नेवारी लिपिः । पङ्क्तयः ७ । आकारः ६$\frac{?}{?}$×३$\frac{?}{?}$ । ग्रन्थसंख्या ७८० । पत्रसंख्या ५४ ।

आदिवाक्यम्-

श्री ३ नृत्यनाथाय नमः ॥ ॥ नान्दीश्लोकः ॥ सानन्दं चन्द्रमौलिःसुरनिवहनुतश्चन्द्रखण्डावतंशो हिण्डीरस्तोमगौरो रविशशिहुतभुग्लोचनो विश्ववन्द्यः । त्रैलोक्यत्राणदक्षस्सुरनगरमरिन्मौलिदेशे दधान(ः)पार्व्वत्याश्लिष्टदेहः फणिपतिवलयः पातु व(ः) शूलपाणिः ॥ ॥ नान्दिमे ॥ हमहारि लिन्हिमा॥ भैरवी ॥ प ॥ जय जय नाथ पहुवसि गिरिनन्दिनि वाने जटहि वहथि अम्बुधार शोभित शशि अर्द्धम् ॥

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पुष्पिका—

इति श्रीमच्छा(त्स्य)वतारनामनाटके प्रथमोऽङ्क समाप्तः
" कच्छावतारनामनाटके द्वितीयोऽङ्कः समाप्तः
" वराह अवतारनामनाटके तृतीयोऽङ्कः समाप्तः
" नरसिंहावतारनामनाटके चतुर्थोऽङ्कस्समाप्तः
" वामन अवतारनामनाटके पञ्चमोऽङ्कस्समाप्तः
" पर्शुरामावतारनामनाटके षष्ठोऽङ्कस्समाप्तः
" रामावतारनामनाटके सप्तमोऽङ्कःसमाप्तः
" बलरामावतारनामनाटके अष्टमोऽङ्कस्समाप्तः
" बौद्धावतारनामनाटके नवमोऽङ्कस्समाप्तः
" कल्क्यवतारनामनाटके दश अवतारकथा दशमोऽङ्कःस्समाप्तः

इत्येकादशोऽङ्कः

इति द्वादशोऽङ्कः

इति श्रीश्रीजयरणजिन्मल्लदेवमहाराजाधिराजपरमभट्टारकविरचिते जलशायिविष्णवाद्यसृष्टि-पर्य्यन्तनामनाटके त्रयोदशोऽङ्कस्समाप्तः ॥ ॥ शुभम् ॥

जयरत्नाकरनाटकम्

क्रमाङ्कः तृ. ५४० **विषयाङ्कः ४४**

ग्रन्थकारः-शक्तिबल्लभः अर्यालः। नेपालीयं कागतम्। देवनागरी लिपिः। पङ्क्तयः १३। आकारः ११$\frac{३}{४}$×४$\frac{५}{८}$। ग्रन्थसंख्या ९८। पत्रसंख्या ३। प्रकीर्णरूपम्।

जालन्धरोपाख्याननाटकम् नेवारभाषायुतम्

क्रमाङ्कः प्र. ४०४ **विषयाङ्कः ४५**

ग्रन्थकारः-जयभूपतीन्द्रमल्लः। नेपालीयं कागतम्। नेवारी लिपिः। पङ्क्तयः १०। आकारः ११$\frac{१}{२}$×६$\frac{१}{२}$। ग्रन्थसंख्या १०१०। पत्रसंख्या ५८। खण्डितम्।

आदिवाक्यम्—

श्रीगणेशायनमः ॥ नमो नृत्यनाथाय ॥ ॥ अथनान्दीश्लोकः कुमुदधवलवर्णं पञ्चवक्त्रं त्रिनेत्रं सुरमुनिगणसेव्यं स्वर्णदीयुक्तमौलिम् ॥ शिशुहिमकरभालं प्रोल्लसद्व्यालमालं नवरससुविशालं नौम्यहं नृत्यनाथम् ॥ अथनान्दी ॥ विकसितमा ॥ मालव ॥ ज. अप. प्र. ए. ॥ प्रथमहिनटकरु त्रिभुवन नाथे विकट प्रमथ गण अनषणसाथे ॥ जय जय देव नटेश ॥ ध्रू० ॥

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पुष्पिकाः—

इतिप्रथमोऽङ्कः । इतिद्वितीयोऽङ्कः ।
इतितृतीयोऽङ्कः । इतिचतुर्थोऽङ्कः ।

अन्त्यवाक्यम्—

केशि हमरहुमने तहने चलु ॥ ॥माया ज

अतः परं खण्डितम् ।

जैमिनिभारतनाटकम्

क्रमाङ्कः प्र. ११२१ विषयाङ्कः ४६

ग्रन्थकारः- सुमतिजितामित्रः । नेपालीय कागतम् । नेवारी लिपिः । पङ्क्तयः ७ । आकारः १६×४ । गून्थसंख्या २८० । पत्रसंख्या २१ । समयः ८०९ ।

आदिवाक्यम्—

ॐनमः श्रीनाटेश्वराय नमः । नान्दिमे ज. अ. थ. प्र. त्रिभुवन नायक ताण्डवनृत्यरतं विधुवर विरक सुवेशं । विदित नटवर भपिङ्गजतं ललितहारभुजगेशं दितिसुतनाशक कलितरगतं त्रिनयन सुपञ्चमुखं अर्द्धहेमनिभमर्द्धकुमुदकुण्डसितं, अभिनयनिपुनमहेशं, पश्यति सुरगणौ भवनृत्यबलितं, नुपूरवर सुरनीतं । भक्तवरदायक गजचर्मवसनं सुररित शङ्कररूपं ॥ वहति जटातटे गाङ्गजलं विमलं सहृदयहृक्ष्यहारि सुमतिजितामित्र कृतहरवर्णनं परिसुखयतु भक्तजनं ॥ मे. १. ॥

पुष्पिकावाक्यानि—

इतिप्रथमोऽङ्कः ।
इति द्वितीयोऽङ्कः ।
इति तृतीयोऽङ्कः ।
इति जैमिनिभारते गीत समाप्तम्

सम्वत ८१० पौष सुदि ३ प्याखन आलम्भ याङा दिन श्रीश्रीसुमतिजयजितामित्रमल्लदेवेन नाटकं सिद्धम् । भूपतीन्द्रमल्लदेवस्येनदयका रो. १

संवत् ८०९ चैत्र सुदि १३ घंति ज्या आरम्भ याङा दिन ॥ १ संवत् ८०९ श्रावणसुदि १ घंति ज्याधुनका दिन ।

जैमिनिभारतनाटकम्

क्रमाङ्कः प्र. १६१७ विषयाङ्कः ४७

ग्रन्थकारः- सुमतिजयजितामित्रः । नेपालीयं कागतम् । नेवारी लिपिः । पङ्क्तयः ६ । आकारः १६३⁄₄×४३⁄₄ । ग्रन्थसंख्या १३०० । पत्रसंख्या ३८ । समयः संवत् ८०९ । सम्पूर्णम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

जैमिनिभारतनाटकम्

क्रमाङ्कः प्र. ४५३ विषयाङ्कः ४८

ग्रन्थकारः–भूपतीन्द्रमल्लदेवः । नेपालीयं कागतम् । नेवारी लिपिः । पङ्क्तयः ६।७ । आकारः ११$\frac{3}{4}$×३$\frac{1}{2}$ । ग्रन्थसंख्या ३७०० । पत्रसंख्या २३६ । १३ अङ्कान्तं पूर्णम् ।

आदिवाक्यम्—

ॐनमो नृत्यनाथाय ॥नान्दाश्लोकः ॥ वामाङ्गेन सतीं गिरीन्द्रतनयां मूर्द्धना दधत्स्वर्धुनीं सर्व्वाङ्गे विकसद्विभूतिधवलश्चन्द्रार्द्धचूडो मुदा । विश्वाधारफणीन्द्रहारवलयी कुर्व्वन्भूमि स्थानकं रङ्गे ताण्डवरौद्रकेलिनिपुनो (णो)नृत्येश्वरः पातु वः ॥ ॥ नान्दीमे ॥ अमरमा ॥ माल्लव ॥ जति वाघा ॥ नृत्येश्वरं रंगभूमिगतं विघ्नसंहारणप्रतिरूपं नृत्यकेलिनिपुनं देवगणनायकं विश्वरक्षकमनुरूपं । भूतप्रेतपिशाचडाकिनीगणैस्सेवितं प्रलयकालानल-रूपं ॥ रजतकुन्देन्दुनिभदेहंकलितभुजङ्गपतिहारं हिमगिरिजया सह प्रेमकरं भूतपत्रि-भुवण(न)सारं, सकलदानवकुलनाशप्रकारं विविधसेवकजनकृतभवपारं ॥ उमापति गङ्गाधरमिन्दुशेखरहरं श्रीकण्ठदेवं त्रिपुरमथन मृत्युञ्जयमीशं विहितविबुधगणसेवं ॥ विषम नयनपञ्चवदनसुरेशं । अभिनवताण्डवकुशलनटेशं ॥ त्रिशूलडमरूपिनाकधरं नरास्थि-शोभितवरहारं सेवकगणपतिप्रमुखप्रमथसुरवरमुनिपरिवारं ॥ भूपतीन्द्रः प्रणमति शिव-मनुवारं भजनमृते तव सकलमसारं ।

पुष्पिका:—

इति श्री ३ सूर्य्यवंशावतंशश्रीश्रीजयभूपतीन्द्रमल्लदेवेन निर्म्मिते जैमिनिभारतनामनाटके प्रथमोङ्कस्साङ्ग एष समर्थितः ।

इति श्रीश्रीजयभूपतीन्द्रमल्लभूपकृतजैमि निभारतनाटके द्वितीयोङ्कः समाप्तः ।

इति श्रीश्रीभूपतीन्द्रमल्लभूपतिविरचिते जमिनिभारतनामनिनाटके तृतीयोङ्कः !

इति श्रीश्री जयभूपतीन्द्रमल्लविरचिते जैमिनिभारतनामनाटके चतुर्थोऽङ्कः समाप्तः ।

इति श्रीश्रीजयभूपतिन्द्रमल्लराजाधिराजविरचिते जैमिनिभारतनामनाटकेपञ्चमोङ्कःसमाप्तः।

इति श्रीसपत्नभूपतिवहलेभकुम्भविदारणधारश्रीमच्छ्रीहरिरूपश्रीश्रीभूपतीन्द्रमल्लमहाराजाधिराजेन निर्म्मिते जैमिनिभारतनामनाटकेऽयंषष्ठोङ्कोगमत्संपूर्णमिति ।

इति श्रीमन्नेपालमणिमण्डलोद्भवविराजमाननरदेववृन्दवन्दितभूयोगजभूपतिवहलशिरस्र-करजोरञ्जितकमलचरणमर्त्यभारपवित्रीकृतश्रीमन्त्यन्ववायतिलकोत्कृष्टभट्टार कश्रीश्रीभूप-तीन्द्रमल्लमहाशजेन विहितेयं जैमिनिभारताख्ये नाटके सप्तमदिनसानुक्रमस्समाप्ति-मगमत् ।

इति श्रीमद्रघुकुलकमलविकाशनदिनेशसपत्नभूभृत्पक्षनिपातनपाकशासनश्रीश्रीजयभूपती-न्द्रमल्लदेवकृतजैमिनिभारतनामनाटकेअष्टमोऽङ्कः समाप्तिमगात् ।

इति निखिल लोकविपद्ध्वान्तविध्वंसनदिवाकरकुलचूडामणिमणिविभूषणचकासत्प्रतीकशो-भाविनिर्ज्जितकंदर्प्पमुहृद्वा र्गकष्टपयाधिसेतुदोर्द्दण्डविराजमानकृपाणखण्डितविपक्षवक्षनि-

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

करसकलताण्डवकलाकौशलश्रीश्रीभूपतीन्द्रमल्लमहाराजाधिराजविहितजैमिनिभारताभिधाननाटके नवमोऽङ्कः समाप्तिमगच्छत्।

प्रभाकरकुलनलिनप्रकाशनद्युमणिरघुवंशावटं(तं)शश्रीश्रीजयभूपतीन्द्रमल्लराजेन्द्रविहितजमिनिभारताभिधाननाटके दशमोऽङ्कः समाप्तिमगात्।

इति श्रीरविकुलप्रभूतसुयशःकीर्त्तिप्रतापपूतश्रीश्रीजयभूपतीन्द्रमल्लदेवप्रणीतजैमिनिभारताख्यनाटके एकादशाऽङ्कःपूर्णोभूत्।

इति श्रीजगत्प्रकाशोत्पन्नजगद्रक्षकश्रीश्रीजयभूपतीन्द्रमल्लमहाराजाधिराजभूपकृतजैमिनिभारतनामनाटके द्वादशोऽङ्कः समाप्तः।

इति श्रीदिनमणिकुलोत्पन्नभूपमुकुटमणिश्रीश्रीजयभूपतीन्द्रमल्लमहाराजाधिराज भपकृतजैमिनिभारतनामनाटके त्रयोदशोऽङ्कः समाप्तः।

त्रिपुरासुरवधोपाख्याननाटकम्

क्रमाङ्कः तृ. ११६ **विषयाङ्कः** ४९

ग्रन्थकारः— ··· ··· । नेपालीयं कागतम्। नेवारी लिपिः। पङ्क्तयः ६। आकारः ६×५। ग्रन्थसंख्या ४००। पत्रसंख्या २५। अन्त्यखण्डितम्।

दिक्पालगणेशोपाख्यानम् नेवारभाषामयम्

क्रमाङ्कः प्र. ३६५ **विषयाङ्कः** ५०

ग्रन्थकारः-जयरणजितमल्लदेवः। नेपालीयं कागतम्। नेवारी लिपिः। पङ्क्तयः ७। आकारः १०३/४×२३/४। ग्रन्थसंख्या १६०। पत्रसंख्या १२।

आदिवाक्यम्—

श्री ३ नृत्यनाथायनमः। नान्दीमे। जयसुरवंदितमा॥ रागविजयज। जसधर। जलधर। शीतरत। भिङजजट। ईस्त्रीनिह्म जोनाविह्म। ह्लालरण। सिओमन।

अन्तिमवाक्यम्—

अन्नपूर्णादेवभावमे॥ भैरवी। ए। जय जय देवि भवानि॥ इत्यादि। मेपु १६॥ ॥

इति श्रीश्रीजयरणजिन्मल्लदेवमहाराजाधिराजविरचिते दिग्(क्पा)लगणेशोपाख्याननाटके प्रथमोऽङ्कस्समाप्तः शुभमस्तु कल्पपर्यन्तम्॥शुभम्॥

धर्मदत्तचरित्रनाटकम्

क्रमाङ्कः च. **विषयाङ्कः** ५१

ग्रन्थकारः कृष्णानन्दः। नेपालीयं कागतम्। नेवारी लिपिः। पङ्क्तयः ७। आकारः ८१/२×३१/२। ग्रन्थसंख्या ५००। पत्रसंख्या ४०। अन्त्यखण्डितम्।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

धूर्तसमागमनाटकम् (प्रहसनम्)

क्रमाङ्कः प्र. १५३३ विषयाङ्कः ५२

ग्रन्थकारः ज्योतिरीश्वरः । ताडपत्राणि । नेवारी लिपिः । पङ्क्तयः ४ । आकारः- १२३/४×१३/४ । ग्रन्थसंख्या २०० । पत्रसंख्या ११ । पूर्णम् । जीर्णम् ।

आदिवाक्यम् ।

ॐ नमो गणेशाय ॥ हर्षादम्भोजजन्मप्रभृतिदिविषदां संसदि प्रीतिमत्या श्वश्रा (श्चा) मौलौ पुरारेर्दु हिति (र्दु हितृ)परिणये साक्षतं चुम्ब्यमाने। त(द्)वक्त्रं मौ(शौ)लिवकत्र (क्त्रे)मिलितमिति भृशं वीक्ष्य चन्द्रः(सहासो)दृष्ट्वा तद्वृत्तमाण्ड(माशु)स्मितिसुभगमुखः पातु वः पञ्चवक्त्रः ॥ अपिच ॥ वक्त्रांभोरुहि विस्मिताः स्तवकिता वक्षोरुहि स्फारिताः श्रे णी (श्रोणी)सीमनि गुम्फिताश्चरणयो वक्षोः (रक्षणोः) पुनर्विस्तृताः ॥ पार्व्वत्याः प्रति-गात्रचित्रगतयस्तन्वन्ति(न्तु) भद्रानि(णि) वो विद्धस्यान्तिकपुष्पसायकशरैरीशस्य दृग्भङ्ग्यः ॥ नान्द्यन्ते सूत्रधारः ॥ अलमतिविस्तरेण ॥ यदद्य नानायोधनिरुद्धनिर्ज्जित-सुरत्राणत्रसद्वाहिनीनृत्यद्भीमकबन्धमेलकदलद्भूमिभ्रमद्भू धरः । अस्ति श्रीहरसिंह-देवनृपतिष्काण्णाटचूडामणि र्द्प्यत्पार्थिवसार्थमौलिमुकुटन्यस्तांघ्रिपकेरुहः ॥ तस्योदण्ड-भुजप्रतापदहनज्वालानिरस्तापदो राज्ञस्सर्व्वगुणानुरागपदवीविद्योतनाचार्य्यकः ॥ यो धीरेश्वरवंशमौलितिलको दातावदाताशयस्तस्य श्रीकविशेष(ख)रस्य कविता मच्चित्त-मालम्बते ॥ तदनेन सकलसङ्गीतविद्याशेषविद्या(द्यो)तनाभिनवभरतेन पुरमथनपादार-विन्दवन्दारुककरपल्लवेन निखिलभाषासुभगभावुकसरस्वतीकण्ठाभरणेन अनवरतसोम-रसास्वादकषायकण्ठकदलीनरीनृत्यमानमीमांसामहोत्सवस्य श्रीरामेश्वरस्य पौत्रेण तत्र-भवतः पवित्रकीर्त्तेर्द्धीरेश्वरस्यात्मजेन महाशासनश्रे णिशेष(ख)रश्रीमत्पल्लिजन्मभूमिना-यककविशेष(ख)राचार्यश्रीज्योतिरीश्वरेण निजकुतूहलविरचितं धूर्त्तसमागमन्नाम नाट-सन(प्रहसन)मभिनेतुमादिष्टोऽस्मि, अस्य चादिष्ट मालतीमालेव मया शिरसि धारणीयं॥

अन्त्यवाक्यम्।

विदू० मिश्रस्य करचरणयो र्व्बन्धमपनोय भो आणवेदु मिस्सो किं अबरं तुह विअ णिव्वा-हइस्सं, अस. संज्ञां लब्ध्वा राष्ट्रं समस्तं कपटेन भुक्तं धूर्तक्रियाभि र्दयितेयमाप्ता । भवान्विनीतो मिलितश्च शिष्यो नातः परन्नः प्रियमस्ति लोके ॥ तथापीदमस्तु ॥ काले सन्ततवार्षिनो(र्षिणो)जलमुचः सस्यैस्समद्धा धरा भूपाला निजधर्मपालनपरा विप्रास्त्रयीनिर्भराः। स्वादुक्षीरनतौर(ध)सः प्रतिदिनं गात्रो विनष्टापदः सन्तः शान्तिपरा भवन्ति(न्तु) कृतिन' सौजन्यभाजो जना (:) ॥ ॥ इति निष्क्रान्ताःसर्व। कविशेष-(ख)राचार्यश्रीज्योतिरीश्वरविरचित धूर्तसमागमं नाम नाटकं समाप्तम् ॥ ॥

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

卐धूर्तसमागननाटकम् (प्रहसनम्)

क्रमाङ्कः प्र. १६६७ विषयाङ्कः ५३

ग्रन्थकारः कविशेखरो जोतिकः (ज्योतिरीशः)। ताडपत्राणि। मैथिली लिपिः। पङ्क्तयः ३-५। आकारः ११$\frac{1}{2}$×१$\frac{3}{4}$। ग्रन्थसंख्या १५०। पत्राङ्काः १३-२५। पत्रसंख्या १३। आदिखण्डितम्। अपूर्णम्। जीर्णम्।

प्रथमपत्रे आरम्भवाक्यम्-

नो जानाति कुलीनमुत्तमगुण (म्) सत्वान्वितं धार्म्मिकं नाचारप्रवणं न कायकुशलं नप्रज्ञा(प्रज्ञया)- लंकृतम्। नीचं क्रूरमपेतसत्वस(म)दयं यस्मादियं सेवते तद्वंसा(शा) नुगुणः(णं) पयोधिसुतया लक्ष्म्या प्रमाणीकृतः(तम्)॥ अरे रे णः परलोयाः (आ) अदुक्ष्य (?) वम्भ णाइइ दिसे दूसमज्झन्हे सव्वत्तमं तुमं महाधनं भेट्टिअ कुदो अण्णदो गंदुआ अह्मेहि भि (क्खा) पथि(त्थि)दव्वा॥ विभासरागे॥ ल नइन पथिक तरुण र... सूरे। एखने हमर गमन नहि दूरे॥ध्रुवं॥ (दिनसकनिज) अतिथि मजे तोरा। चिन्तहि घनिक शुडोएण मोरा। (?)। भगवदोखमलङ्कार···भावे। कविशेष(ख)र जोतिक एहु गावे॥ मृगाङ्कारः भगवन् अस्मदावासोतरे सुरतात्विआ (सुरतप्रिया) नाम मासोपवासिनीति तत्र गम्यताम्" इत्यादि॥

अन्तिमपत्रे अन्तिमवाक्यम्-

असज्जातिःसवेदनं, दलति हृदयमेतम्मोहमभ्येति चेतः स्फुटति सकलदेह(हे)काकसग्रन्थिसन्धिः। विरम विरम शिल्पान्मूलनाशत्वमस्माच्छिव शिव शिव सद्यो जीवितं त्र्युट्यतीव॥ इति मोहमुपगतः॥

नलीयनाटकम्

क्रमाङ्कः प्र. ३६७ विषयाङ्कः ५४

ग्रन्थकारः जयजगत्प्रकाशमल्लः। नेपालीयं कागतम्। नेवारीलिपिः पङ्क्तयः ६। आकारः ८×३। ग्रन्थसंख्या १२००। पत्रसंख्या १०८ प्रान्ते मूषिकदष्टम्। पूणम्।

आदिवाक्यम्-

ॐ नमः श्रीनृत्येश्वराय॥ श्रीगुरुगणेशाय नमः। कामोद। चो। चाँदवदन हर चाँदतिलकधर, चाँदशेखर वर नाम, भमिते भमयकय सदाशिव नाचर गौरी राखल दिश वाम॥ दुयि

卐 अत्रत्ये लिखितसूचीपत्रेऽस्य ग्रन्थस्य सामान्यतो 'भाषासंस्कृतनाटक' मित्येवोल्लेखो विहिता वर्तते॥

पूर्वस्माद्धूर्तसमागमादिदमस्य वैशिष्ट्यं यदत्र रागनामनिर्देशपूर्वकं मैथिली(?) भाषायां गीतिपद्यान्यपि तत्र तत्र प्रयुक्तानि पूर्वत्र च तदभाव इति॥

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दुगुण मुख सेहि भेल तालधर माधव मुरुज बजावे मुणिगणे गाव रसुसवदेपिक सम रवि शशि झरझर आवें । गणपति सेनापति दुहु जन कएरह सानन्द नृत्यविहार, गगण एषण भेल फुलकवृष्टि अतिकरि नृप देल जलधारे ॥ जगतप्रकाश भन चाँदशेखर धन भुगुति मुगुति देवि . सारे । जगतजननि करु साधक अभिमत अपारकरुणासिंधुपारे ॥सूत्र-प्रवेशः॥ नान्दीश्लोकः । वामांगे सरोखा (षा) स्फुरति मम मुहु मूर्द्ध्नि वामा तथान्या विन्यासार्थमेते प्रतिपलकलहं कुर्व्वते नः फणीन्द्राः । इत्थं स्वं हि शोचन्नमरपरिवृधः (ढः) पूर्णसत्प्रेमपूरे पायाद्वः प्रसन्न रुचिरतनुरुचिर्म्मंगलेशो महेशः ॥

अन्तिमपुष्पिका-

इति श्रीश्रीजयजगतप्रकाशमल्लविरचितं नलीयनाटकं संपूर्णम् । संवत् ७९० श्रावणवदि २ ।

नागानन्दनाटकम्

क्रमाङ्कः प्र. १५८३ विषयाङ्कः ५५

ग्रन्थकारः श्रीहर्षदेवः । ताडपत्राणि । भुजवलाक्षरम् । पंक्तयः ६ । आकारः १३$\frac{5}{2}$×३$\frac{3}{2}$। ग्रन्थसंख्या ८४० । पत्रसंख्या ३९ । समयः ने.सं. ४३८ । आदिमध्यखण्डितम् ।

नागानन्दनाटकम्

क्रमाङ्कः तृ. ३६३ विषयाङ्कः ५६

ग्रन्थकारः श्रीहर्षदेवः । ताडपत्राणि । वङ्गलिपिः । पंक्तयः ८ । आकारः ११$\frac{3}{2}$×२ । ग्रन्थ-संख्या १००० । पत्रसंख्या २२ । समयः ने. सं. ३१३ । आदिमध्यविकलम् ।

पद्मावतीनाटकम् (नेवारभाषामयम्)

क्रमाङ्कः प्र. ३८० विषयाङ्कः ५७

ग्रन्थकारः जयभूपतीन्द्रमल्लः । नेपालीयं कागतम् । नेवारी लिपिः । पंक्तयः ५-६ ।आकारः ९$\frac{1}{2}$×३$\frac{1}{2}$ । ग्रन्थसंख्या ८०० । पत्रसंख्या ९१ । अङ्कत्रयात्मकम् । घृष्टाक्षरम् । जीर्णम् ।

पशुपतिप्रादुर्भावोपाख्याननाटकम् (नेवारभाषायुतम्)

क्रमाङ्कः प्र. ४६० विषयाङ्कः ५८

ग्रन्थकारः जयभूपतीन्द्रमल्लदेवः । नेपालीयं कागतम् । नेवारी लिपिः । पंक्तयः ६ । आकारः १०$\frac{1}{4}$×३$\frac{1}{4}$। ग्रन्थसंख्या ९६० । पत्रसंख्या ८०।३ अङ्कान्तं । खण्डितम् घृष्टम् । अतिजीर्णम् ।

अन्तिमपुष्पिका-

इति श्रीहिमवत्खण्डे श्रीश्रीश्रीपशुपतिप्रादुर्भावोपाख्याननाम नाटकः समाप्तः।

समयः- संवत् ने. ८३१ नष्टभाद्रपद…मूलनक्षत्र विष्कुम्भयोग आदित्यवार

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पाण्डवविजयनाटकम्

क्रमाङ्कः प्र. ६९४ विषयाङ्कः ५९

ग्रन्थकारः शुभराजः। ताडपत्राणि। नेवारी लिपिः। पङ्क्तयः ७। आकारः १३×२। ग्रन्थसंख्या ५५०। पत्रसंख्या ४५। अपूर्णम्। कीटदष्टं। घृष्टाक्षरम्।

आदिवाक्यम्–

ॐनमो नाट्येश्वराय॥ हस्ते न्यस्तांवुजस्योदरजननसुरस्योत्तमांगप्रधानं मुण्डाबद्धालिमालामचलगतितमां राजतां कंधरेस्मिन्। पंचात्मीयोत्तमांगं श्रवसि फणिपतेः क सहस्रं धृतं तद् भीमास्योसौ कपाली त्रिजगत विदितः पातु वो नृत्यनाथः॥ अपिच॥ पूर्व्वं रत्नाकरस्य तनय (रत्नाकरोत्थं भुवनि) भयकरं कालकूटं सुघोरं धृत्वा ग्रीवाप्रदेशे तुहिनगिरिवरे एति पूर्ण्णम्पिनाकी। तस्मिन् श्रीदेवषा(खा)ते जलस(श)यनकृतो लोकसंत्राणहेतोः पापंविध्वंसदेहस्तरतु भुवि जनान्सर्व्वदा नीलकण्ठः॥ इत्यष्टपदी नान्दी॥ नान्द्यन्ते विनायकः सपरिवारः प्रविशति॥ विना॥ सर्व्वानाहूय॥ सव्व॥ किं (गण) णाहो॥ विना॥ मुने भृंगिन्॥ भृंगी॥ भगवन् गणपते किमादिशसि॥ विना॥ श्रूयतां मद्भारती॥ देवः श्रीसुरवारणेन्द्र (वदनोदेवाधिदेवा) न्मजः (त्मज) सिंदूरारुणकान्तिसुन्दरतनुः शक्त्या समालिंगितः। नृत्यानामपि सिद्धिसाधनविधौ सौभाग्यसिद्धिप्रदः सोहं विघ्नहरो म (हागणपति विघ्नादि) वश्यङ्करः॥ सिद्धि॥ गणवइ एसा सिद्धिदाइणी विण्णवेमि॥ सुरणरविण्णरेण तुम्हं प्रथमे आराधिअ गणेसो। तत्साह ... ... णिम्मल सरूवो सिद्धिदाइणी एसा॥विना॥ साधुदेवि सिद्धिदायिनि साधु॥ऋद्धि॥ हेरंवणाह एसा ऋद्धिदाइणी गोचरइस्सं॥ सुरबइ करिवअणो संकरणंदणो त्रिलोअणो देवो। ऋद्धि ददह्मि एसा, तुव परसण्णेण सअलजणस्स॥ विना॥ देवि ऋद्धिदायिनि भद्रमभिहितं भवत्या॥ सौभा॥ गणणाह एसा सोहग्गदाइणी णिवेदइस्सं॥तरुणीजनस्स सोहग्गं दिज्जमि तुम्हाण सँमत्ता। हेरंवणाह तुम्हं पहरदु भवकलुसं णिमेसेण॥विना॥ देवि सौभाग्यदायिनि युक्तमुक्तं ते॥वश्य॥ णाह एसा वस्सदाइणी विज्ञापइस्सं॥ एसा तव प्पभावेहिं तुज्झ भत्तस्स सव्वधा। वस्सं जेव प्पदाइस्सं तुरिअं वस्सदाइणी॥विना॥ देवि वश्यदायिनि सत्यमाह भवती॥भृंगी॥ भगवन् गणपते श्रूयतां॥ जयदेव गणेश्वर विघ्नहर सुरराजकरीन्द्रमुखांवुरुह। कनकाचलसंनिभदेहवर प्रणमामि तवांघ्रियुगं शुभदं॥ विना॥ मुने कीकशविग्रह एवमेतत्कः संदेहः पश्य॥ दुर्भिक्षं जनमारीञ्च परराजविचेष्टितं नाशयामि न सन्देहो म (र्त्यानां ...)॥ (भृंगी)॥ भगवन् गणपते तदितो गत्वा मर्त्यंमण्डलमवतरामः॥ सर्वे॥ एवमवतराम॥ परिक्रम्य भृंगी॥ भगवन् पश्य २॥ हि(मालय ... ...)ण्डकसन्निभः। देशः किं नाम देवानामालयोऽयं विराजते॥ विना॥ मुने किं न जानासि श्रूयतां॥ भूवधूतिलकप्रायो नेपालोयं विरा(जते)। ...... शम्भुः पशूनां पतिरव्ययः॥ तद्वयं वाग्वतीजले स्नात्वाऽस्मत्तातं श्रीश्रीश्रीपशुपतिं समभ्यर्च्चयामः॥ सर्व्वे॥ एवं समभ्यर्च्चं-

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यामः ॥ इत्याराधनं नाटयन्ति ॥ भृङ्गी ॥ भगवन्गणाधिराजःनेपालभूमण्डलस्य कों भूपतिः ॥ विना ॥ मुने भृंगिन्कथमनभिज्ञस्त्वमेव (म्) शृणु ॥ श्रीमत्कर्पूरदेव्यास्तनयनृपवरः सत्प्रतापासुरारि भूमौ यस्यैव कीर्त्तिः शशिकरविमला विश्वदिग्मध्ययाता । भूपानंतो धृतो यो धरणिकिटिसमः श्रीप्रभू रायमल्लो दातार्थिभ्यो विवेकी सकलजनकृपः शोभते मर्त्य-लोके ॥भृंगी॥ पत्तनं स्वर्ग्गसंकाशं प्रासादैः परिशोभितं । पालितं केन भूपेण (न) वद त्वं शङ्करात्मज ॥विना॥ मुने श्रूयतां ॥ संराजते त्रिदशनाथपुरे (री) व रम्या चण्डेश्वरी विविधदेवगणैः समेता । वैणापुरीति विदिता गुणिनां निवासा(सः) संपालिता च रणमल्ल-नृपेण धर्म्मैः ॥ सर्व्वा (:) शब्दमाकर्ण्णयन्ति ॥ अयि सुव्वसंगीदसद्दो वद्दिद॥विना॥ भवत्यः किं न जानंति ॥ कृताविवाहकल्याणे वेणीसंहारनाटिका । वर्त्तते श्रूयते तस्या मुरुजादि-महाध्वनिः॥भृंगी॥भगवन् गणेश्वर तदत्र विवाहोत्सवे च तस्मिन्महानाटके प्रत्यूहप्रशमनाय भगव(ा)न्सन्निधत्तां सपरिवारः॥सर्वे॥ मुने एवं गच्छामः ॥ इति निष्क्रान्ताः ॥१।। ततः प्रविशति सूत्रः ॥ अये समुदेति भगवान्सूर्यः ।। भ्राजिष्णु र्भगवान् भानुः (कोकानां) योग(का)रकः। योगिनां ज्ञानदो योसौ भोगिनामपि भोगदः ॥ परिक्रम्य ॥ यदहमादिष्टो-ऽस्मि निखिलसामंतचक्रचूडामणिमरी (चिमञ्जरीचर्चित) चरणकमलेन सकलगान्धर्व-विद्यागुणरत्नाकरेण, अष्टदिग्विलासिनीकर्ण्णपूरीकृतकीर्तिपल्लवेन दिनकरकुलपंकेरुहविकाश (स)नैकभास्क(रेण) (नेपालम)ण्डलेश्वरवीरनारायणावतारेण श्रीमता श्रीश्रीजयरण-मल्लदेवभूपालेन ॥ य एषः ॥ लोके ख्यातिमहीश्वरो नृगणैः संसेव्यमानोऽनिशं वीराराति-करीन्द्रदर्प्पविजितः(विजये) पंचाननोयं वली । भूपः श्रीरणमल्लदेवगुणवान्पुण्येन संवर्द्धितो भाति स्म भुविमण्डले च विजयी श्रीराजनीत्या पुनः।। अये विविधगुणालंकृतपरिवृढ़स्या-तिमनोहरा परिषदियं पुरतः ।। यस्यामसौ जयतु माधवमल्लदेवस्तस्यानुजो नृपतिकेशवमल्ल एषः ।। व्याकोषतामरससुन्दरवक्त्रचन्द्रः प्रह्लादिताखिलसमस्तजनो विभाति ॥अपिच॥ नाथल्लदेविरमणो भुवने प्रसिद्धः कीर्तिप्रभावलिताखिलदिग्विभागः। प्रत्यर्थिवीरकुमु-दाकरचण्डरोचिः संराजते विजयमल्लकुमारकोयं ।।तथाहि।।अन्यैरपि सहामात्यैः कुमारैर्गु-णवत्सलः सोत्सुकैर्भारतस्यापि चरित्रश्रवणे नृपः।। तस्मात्किं विलंव्यते गृहिण्या प्रिये आगम्यतां ।। प्रविश्य नटी ।। अज्जउत्त एतेषां दिग्देशभूपतीनां हृदयगताभिप्रायगुणप्रवंधं नाटकं (किं) नापि(धिगम्यते) ॥ सूत्र ॥ किमुक्तं ।। नटी ।। इदमुक्तं ॥ श्रीनारायणपक्ष-पातकुशलं धर्म्मं(र्म्यं) जगत्पावनं वीरोधृत्यचरित्रचित्रितकथारम्यं मनोहारिणं ।। सत्यानां विजयस्तथा परिभवो दुष्टाशयानां परं संग्रामा(ण(न,भवं ति) यत्र रथिना(म्) तं (तन्) नाटकं नृत्यतां ।।सूत्र।। प्रिये अस्त्येतच्छ्रूयतां श्रीमता श्रीश्रीजयरणमल्लदेवेन राज्ञा स्वयं निर्म्माय गीतवाद्य (नृत्यैर्योजितम) भिनयनवनाट्यरस(स)मुदयं समस्तनाटक-लक्षणालंकाराणि(?)रचनाचमत्काररमणीयं पाण्डवविजयं नाम नाटकं नाटयितव्यं।। श्रीमत्माधवमल्लस्य देव्या सार्धं यथोचितं। विवाहोत्सवकल्याणं भुवने च प्रवर्तते ।।नटी।। अज्जउत्त कः पुनरेतस्य नाटकस्य कर्ता कविः ।।सूत्र।। प्रिये किं न ज्ञायते ।। अस्ति सूद्रान्वये

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

जातोऽभयराजकवीश्वर । तत्पुत्रः शुभराजोऽसौ तेनेदं रचितं शुभं ॥ नटी ॥ घण्णो २ महानुभावो ॥सूत्र । तत्कवे परिहारवचनमेतत् ॥प्रभो राज्ञां शिरो धृत्वा मूर्खत्वेन मयाकृते यचस्ति नाटके दोषं(षः) क्षंतुमर्हन्ति पण्डिताः ॥

अन्त्ये- अविस्पष्टाक्षरतया दुष्पठम् ॥

पुष्पिका-इति शुभराजकृते महाभारते शिशुपालवधोनाम प्रथमोङ्कः ॥

इति शुभराजविरचिते महाभारते गुप्तवासः (से) स्थातुं योग्यनृप (स) मवलोकनार्थं भीमसेनप्रेषणो(णं) नाम द्वितीयोङ्कः समाप्तः ॥

पारिजातहरणनाटकम्

क्रमाङ्क प्र. ४२० विषयाङ्कः ६०

ग्रन्थकारः जयजगत्प्रकाशमल्लः । नेपालीयं कागतम् । नेवारी लिपिः । पंक्तयः ६ । आकारः ११×३$\frac{3}{8}$ । ग्रन्थसंख्या ६१६। पत्रसंख्या ४५ ।

आदिवाक्यम्-

ॐनमः श्रीनृत्यनाथाभ्याम् । नान्दी । रामकरी ॥चो॥ प्रथमतो चन्द्रशेष(ख)र नाचयहो ॥ध्रू ०॥त्रयनपर विभूतिलगावत तिलक शशि भयि सोहा । कानन कुण्डल सरय(प)विराजित पदपङ्कज मनलोभा। जगजगकी नचनिया सदाशिव गुरु जव जानिया नन्दि मुनिगणप्रेमप्रकाशित गावत हसि हसि देख चण्डि । परकाश कह चंदशेखर जीवन निशिदिन सुमरत नाम गौरीशंकर पद सिनेहि देहि मोर तेसो संगत मेरो काम ॥ सूत्रप्रवेश ॥

पुष्पिकावाक्यानि-

इतिप्रथमोङ्कः । इति द्वितीयोङ्कः ।

इति श्रीश्रीजयजगत्प्रकाशमल्लकृत पारिजातहरणनाटकम् तृतीयोङ्कं समाप्तम् । शुभम्

पृथूपाख्याननाटकम् (नेवारभाषामयम्)

क्रमाङ्कः प्र. ३६५ विषयाङ्कः ६१

ग्रन्थकारः जयरणजितमल्लः । नेपालीयं कागतम् । नेवारी लिपिः । पङ्क्तयः ७ । आकारः १०$\frac{3}{5}$×३$\frac{3}{8}$ । ग्रन्थसंख्या ५८० । पत्रसंख्या ३५ ।

आदिवाक्यम्

श्री ३ अर्द्धनारीश्वराभ्यां नमः । आदौ नान्दीश्लोकः । श्रीदेवीअरधंग हर्षणतलं धूले गुलि जाहिसा, गंगा चन्द्र जटासुन्दरविनं शोभायमानं चोना, ब्रह्माविष्णुसुरेन्द्रदेवसकलं याना स्तुति नित्यनं ओह्मानन्दको लोकया मनोरथं पूण थयातेननां। ततो नान्दिगीतम् ।

पुष्पिकावाक्यानि।

इतिप्रथमोऽङ्कः । इति द्वितीयोङ्कः ।

इतिश्राजयरणजितमल्लदेवमहाराजाधिराजसकलचक्राधीश्वरविरचितपृथुपाख्याननामनाटक तृतीयोङ्कः समाप्तः

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्रबोधचन्द्रोदयनाटकम् (षोड़शाङ्कात्मकम्)

क्रमाङ्कः प्र. १४४२ विषयाङ्कः ६२

ग्रन्थकारः जगज्जयमल्लः। नेपालीयं कागतम्। नेवारी लिपिः। पंक्तयः ७। आकारः ११$\frac{३}{८}$×३$\frac{१}{८}$। ग्रन्थसंख्या १२००। पत्रसंख्या १३४। पूर्णम्।

आदिवाक्यम्।

ॐ श्री ३ नृत्यनाथाय नमः॥ यज्ज्ञानेनविभाति वस्तु निखिलं विद्युच्छटासंनिभं ज्ञाना-भावतयानृतं भ्रमवशात्सत्यं जगद्भासते। तन्नित्यं शशिशेष(ख)रं परचिदानन्दात्मकं निर्म्मलं सर्व्वज्ञं वरताण्डवैकनिरतं श्रीनृत्यनाथं भजे॥ ॥नान्दीमे॥ रागमालव॥ नवमान॥ जय नाटेश्वर वसन वघम्बर नागभूषण, सुन्दरिशक्ति धरे अधअंगे। कलुषवि-दारण भवभयतारण सुरमुनिपूजित सं,गे॥ जय २ निरंजन देव॥ध्रू॥ चन्द्रशेषर नयन विरूग्न जता(टा)विलसितगङ्ग मुक्तिविधायक कुमतिनाशकः, शोभितधवलितलंगा॥ भक्तरंजन, मोहविभंजन, मंगलसकलनिदाने कुमुदिदीपति जयतजय जयकहे शंकरपदयुग ध्याने॥ ॥नान्यन्ते सूत्रधारः अलमतिविस्तरेण ॥सूत्रप्रवेशंमे॥ नागनाट॥ एकतालि भज रसनायकदेववरं त्रिभुवनकारणव्रह्म परं।। भवसागरप्लवशूलधरं हरिपंकजभवप्रणति-करं॥ कुमुदिनिनायकदीनकृपं। पाहि जगज्जयमल्लनृपं॥ ॥पुष्पाञ्जलिश्लोकः॥ मनो-रथविधायकः सकलविघ्नविध्वंसकः सरोजदलमालतीवकुलचम्पकाद्यैष्कृतः। करोतु नृप-मंगलं विबुधवृन्दसंसेविते सदाशिवपदाम्बुजे निहित एष पुष्पाञ्जलिः॥ ॥सूत्र॥ अयि प्रिये चन्द्रवदने॥ प्रविश्य नटी॥ नटो ओ ओतिप॥ नटी॥ इयम्हि आणवेदु अज्जो को णिओ ओ अणुचिण्ठीअदुत्ति॥ सूत्र॥ अयि मृगलोचने श्रूयतां॥ ॥नटी. अज्जउत्त, प्रणमामि॥ (सूत्र)॥ आज्ञप्तोस्मि महाराजेन जम्बुद्वीपाधिष्ठितसकलराजचक्रचूडामणिमञ्जरीवि-राजितचरणकमलेन अगणितगुणगणगरिमगंभीरमहिमरत्नाकरनिरवधिवितन्यमानवितरण सन्तानजनितयशस्तोमसोमेन, अनेकविबुधसंगशास्त्राम्बुधिमन्थनोपार्जितज्ञानचन्द्रे न(ण) पुरहरमुरहरहररमणीचरणपरिशीलनैकचित्तेन, तरणिकुलजलधिकौस्तुभायमानहनुमद्ध्व-जेन, श्रीश्रीश्री युतजगज्जयमल्लभट्टाल(र)केन(ण) निखिलसुरासुरमुकुटमणिमञ्जरीविरा-जितचरणपंकजस्य, सुरनदीसंशोभितपिङ्गलजटाभारभास्वरस्य श्रीश्रीश्रीपशुपतिभट्टार-कस्य यात्राप्रसंगेन दिगन्तवासिनो विबुधा वेदान्तिनस्तपस्विनश्च समागताः, इदानि(नीं) वयमपि कृतकृत्याः यतः हत्वा बलेन समरे परिपंथिवर्गं यज्ञं विधाय विविधं वलिपूजनं च। प्राप्तोस्मि शैलशिखरे सुखदं सुराज्यं नातस्परं किमपि मे करणीयमस्ति॥ तदस्मत्कृतमभिनयं प्रबोधचन्द्रोदयं नाम नाटकमभिनेतव्यं भवतेति॥ नटी, अज्जउत्त॥ तस्स सअअलोअसंहाविदस्म(स्स)अहिनवजोव्वणस्स सुरअणसलाहिअचलिदरस कधं सान्तरसे पउत्ती॥ ॥सूत्र॥ अयि प्रिये अयमपि जनक इव मोक्षैकसाधको राजा यतः॥ राजा युवा तिष्ठति भोगमध्ये लिप्तो न कुत्रापि यथा जलेब्जं। अद्वैतबोधे प्रतिपन्नभावो मायाप्रपञ्च(ञ्चै)रहितः स्वभावः॥ ॥नटी॥ अच्चरिअं २ तस्स पुरीण आणम्मिता,

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

आणवेदु अज्जउत्तो ।।सूत्र।। आर्ये श्रूयतां, श्लोकः ।। पुरन्दरपुरीसमा विविधदेवसंसेविता पुरारिनगरीव या सकलजीवमोक्षप्रदा । अनल्प(सुखयायु)ता चतुरसुन्दरीभिर्वृता विभाति गिरिशेखरे नवरसा हि कान्तीपुरी ।। ।। देशवण्णनामे ।। राग ।। सोरथ ।। खज्जति ।। अतिशोभाधरि नगरि सोहाओना, देवपुराओ न समान । धवल कीनतिचन्दा परकाशय, कुंजलकनकेरो दान ।। सोहाओना ।। लोक सदा मन धरमविचारणा नारि मनोहररूप । रसिकपण्डितसभा परमारथ कामसुन्दर यत भूप ।। सोहाओना ।। देवदेवीजन करिल विभावना पायि पदारथज्ञान । कुमुदिनिदेवीपति नृपतिनागर मल्ल जगतजय भान ।। ।। नटी ।। अज्जउत्त सो कीरिसो महाराओ, ता वण्णअदु ।। ।। सूत्रः ।। अयि प्रिये श्रूयतां, श्लोकः ।। कीर्त्या चन्द्र इव प्रतापनिकरै श्चण्डांशुवत्संगरे वीरष्पार्थ इव प्रबन्धकविताशास्त्रेषु वाचस्पतिः । ऐश्वर्ये विपुले पुरन्दरसमो योषित्सु काम (:) स्वयं, नेपालेन्द्रजगज्जयो विजयते राजाधिराजस्सदा ।। ।।

अन्त्यवाक्यम्—

आशीर्व्वादश्लोकः ।। विप्रा वेदरता भवन्तु परमब्रह्मै कनिष्ठाः पुन(र्)भूपाष्पान्तु मही(म्) समाधिनिपुण(णा) गच्छन्तु विष्णोः पदम् । यावच्चन्द्रदिवाकरौ हि गगने मेरौ महेन्द्रादय स्तावद्वीरजगज्जयक्षितिपतिर्ज्जीयादसौ सान्वयः ।। ।। सर्व्वे ।। तथास्तु २ ।। थनसकल्यं आनन्दन ओं ।। ।। राग केदारा ।। सकर (ल)मिलिया जायि आनन्द दिया रे,ए दिया रे ध्यान करि कलितग्यान जगज्जय नरपति नाथ दिया रे, कुमुदिनिपति एह भान ।। ।।लु६।। ।। आरतिमे ।। ।। पञ्चममे ।। ।। राग ।। पञ्चम ।। ख ।। सम्वत नेपालरसजलधि वसुमान पौषशुक्ल शुभदिन चतुर्द्दसि जान वारतो अमरगुरु, पुनर्व्वसु तार, मंगलकलित योग विष्कम्भा विचार करिलो जगतजय जगतउधार प्रबोधचन्द्रोदयनात (ट) केरो सार । इत्यादि ।।

पुष्पिका:-

इति श्रीमन्महाराजाधिराजतरणिकुलकौस्तुभायमाननेपालेन्द्रश्री२युतजगज्जयमल्लदेवविरचिते प्रबोधचन्द्रोदयनामनाटके प्र(थ)मोङ्कः ।। ।।

श्रीमहाराजाधिराजतरणिकुलजलधिकौस्तुभायमानरघुवंशावतंसश्रीश्रीश्रीयुतजगज्जयमल्लदेवविरचिते अभिनवप्रबोधचन्द्रोदयनामनाटके द्वादशोऽङ्कः ।। एवमन्यत् ।।

समयः-ने. सं. ८५४ वैशाखशुक्लदशमी बुधवारः ।

प्रबोधचन्द्रोदयनाटकम्

क्रमाङ्कः प्र. १४१८ विषयाङ्कः ६३

ग्रन्थकारः कृष्णमिश्रः । मध्यदेशीयं कागतम् । देवनागरी लिपिः । पङ्क्तयः ८ । आकारः १३×४½ । ग्रन्थसंख्या ६०० । पत्रसंख्या ४६ । जीर्णम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्रबोधचन्द्रोदयनाटकम्

क्रमाङ्कः प्र. १४१८ **विषयाङ्कः ६४**

ग्रन्थकारः श्रीकृष्णमिश्रः। मध्यदेशीयं कागतम्। नेवारा लिपिः। पंक्तयः ८। आकारः- १४ ३/८ × ४। ग्रन्थसंख्या ९००। पत्रसंख्या ४३। ६अङ्कात्मकं पूर्णम्।

प्रबोधचन्द्रोदयनाटकम्

क्रमाङ्कः प्र. १४६२ **विषयाङ्कः ६५**

ग्रन्थकारः श्रीकृष्णमिश्रः। नेपालीयं कागतम्। देवनागरी लिपिः। पङ्क्तयः ८। आकारः- ११ × ४ १/४। ग्रन्थसंख्या ९०। पत्रसंख्या ८। अपूर्णम्।

प्रबोधचन्द्रोदयनाटकम्

क्रमाङ्कः प्र. १६९७ क. ३१ **विषयाङ्कः ६६**

ग्रन्थकारः श्रीकृष्णमिश्रः। नेपालीयं कागतम्। नेवारा लिपिः। पंक्तयः ९। आकारः- ११ १/२ × ३ ३/७। ग्रन्थसंख्या ८५०। पत्राङ्काः २-३५। पत्रसंख्या ३४। आद्यन्तरहितम्।

प्रबोधचन्द्रोदयनाटकम्

क्रमाङ्कः प्र. १६९४ **विषयाङ्कः ६७**

ग्रन्थकारः श्रीकृष्णमिश्रः। मध्यदेशीयं कागतम्। देवनागरी लिपिः। पङ्क्तयःअनियताः। आकारः १४ ७/८ × ५। ग्रन्थसंख्या ५०० पत्रसंख्या १९। अपूर्णम्।

प्रबोधचन्द्रोदयनाटकम्

क्रमाङ्कः च. **विषयाङ्कः ६८**

ग्रन्थकारः श्रीकृष्णमिश्रः। ताडपत्राणि। मैथिली लिपिः। पंक्तयः ४-५। आकारः- १३ १/२ × १ १/२। ग्रन्थसंख्या ९००। पत्रसंख्या ५७। पूर्णम्।

प्रबोधचन्द्रोदयनाटकम्

क्रमाङ्कः च. **विषयाङ्कः ६९**

ग्रन्थकारः श्रीकृष्णमिश्रः। मध्यदेशीयं कागतम्। देवनागरी लिपिः। पंक्तयः अनियताः। आकारः ११ १/२ × ४ १/२। ग्रन्थसंख्या। पत्रसंख्या ६७। अपूर्णम्।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्रबोधचन्द्रोदयनाटकम्

क्रमाङ्कः प्र. १५९६ — विषयाङ्कः ७०

ग्रन्थकारः श्रीकृष्णमिश्रः। नेपालीयं कागतम्। नेवारी लिपिः। पंक्तयः ७। आकारः- ८१/२×१३/४। ग्रन्थसंख्या ९००। पत्रसंख्या ८२। मध्येखण्डितम्।

प्रबोधचन्द्रोदयनाटकम्

क्रमाङ्कः १६०९ — विषयाङ्कः ७१

ग्रन्थकारः श्रीकृष्णमिश्रः। नेपालीयं कागतम्। देवनागरी लिपिः। पङ्क्तयः ७। आकारः ९७/८×३। ग्रन्थसंख्या १०००। पत्रसंख्या ४७। प्रकार्णरूपम्।

प्रबोधचन्द्रोदयनाटकम्

क्रमाङ्कः प्र. १५३४ — विषयाङ्कः ७२

ग्रन्थकारः श्रीकृष्णमिश्रः। ताडपत्राणि। नेवारी लिपिः। पंक्तयः ५। आकारः ८१/२×१३/४ ग्रन्थसंख्या ८००। पत्रसंख्या ११४। ६ अङ्कान्तं पूर्णम्।

प्रबोधचन्द्रोदयनाटकम् (नेपालीयभाषामयम्)

क्रमाङ्कः तृ. ७३५ — विषयाङ्कः ७३

ग्रन्थकारः नारायणः (?)। नेपालीयं कागतम्। देवनागरी लिपिः। पङ्क्तयः अनियताः। आकारः १२×४४/५। ग्रन्थसंख्या २४००। पत्रसंख्या ५९। समयः वि. स. १९३२। पूर्णम्। वैष्णमतिनद्यां निकटे, धुरीखेलग्रामे लिखितं लिखनार्थे पद्मदासभक्तानां ॥

प्रबोधचन्द्रोदयनाटकम् (प्रकाशाख्यटीकासहितम्)

क्रमाङ्कः प्र. १५७० — विषयाङ्कः ७४

ग्रन्थकारः श्रीकृष्णमिश्रः। टीकाकारः रामदासः। नेपालीयं कागतम्। नेवारी लिपिः। पङ्क्तयः अनियताः। आकारः ११×५। ग्रन्थसंख्या ८००। पत्रसंख्या ५२। आदिरहितम्। प्रान्ते मूषिकभाक्षतम्।

प्रबोधचन्द्रोदयनाटकम् (प्रकाशाख्यटीकासहितम्)

क्रमाङ्कः प्र. १४१८ — विषयाङ्कः ७५

ग्रन्थकारः श्रीकृष्णमिश्रः। टीकाकारः रामदासदीक्षितः। मध्यदेशीयं कागतम्। नेवारी लिपिः। पङ्क्तयः अनियताः। आकारः १३१/३×५१/३। ग्रन्थसंख्या १५००। पत्रसंख्या- १०६। ६ अङ्कात्मकं पूर्णम्।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्रबोधचन्द्रोदयनाटकम् (प्रकाशाख्यटीकासहितम्)

क्रमाङ्कः तृ. १३६ विषयाङ्कः ६७

ग्रन्थकारः श्रीकृष्णमिश्रः । टीकाकारः भट्टनायकात्मजरामदासः । नेपालीयं कागतम् । नेवारी लिपिः । पङ्क्तयः ११-१४ । आकारः१२$\frac{३}{४}$×५$\frac{३}{४}$ । ग्रन्थसंख्या १२०० । पत्रसंख्या-७६ । समयः ने. सं. ८८२ पूर्णम् ।

प्रबोधचन्द्रोदयनाटकम् (प्रकाशाख्यटीकासहितम्)

क्रमाङ्कः प्र. २९६ विषयाङ्कः ७७

ग्रन्थकारः श्रीकृष्णमिश्रः । टीकाकारः दीक्षितरामदासः । नेपालीयं कागतम् । देवनागरी लिपिः । पंक्तयः १२-१५ । आकारः ११×५ । ग्रन्थसंख्या १४०० । पत्रसंख्या ६३ । समयः शाके १६१३ । अपूर्णम् ।

आदिवाक्यं मूले-

श्रीगणेशाय नमः ॥ ॐगुरवे नमः ॥ ॐमध्यान्हार्कमरीचिकास्विव पयःपूरो यदज्ञानतः खं वायुर्ज्वलनो ज्वलं क्षितिरिति त्रैलोक्यमुन्मीलति ॥ यत्तत्वं विदुषां निमीलति पुनः स्रग्भोगिभोगोपमं सान्द्रानन्दमुपास्महे तदमलं स्वात्मावबोधं महः ॥

टीकायां—

श्रीगणेशाय नमः ॥ ॐ गुरवे नमः ॥ गामं विनायकं वन्दे सदानन्दं गुणाकरम् ॥ संसारतापहंतारं कारणं विघ्नवारणम् ॥१॥ अथ कमप्यन्तेवासिनं बहुशोऽध्यापितवेदान्तसिद्धान्तमपि तत्रावबोधपराङ्मुखं नाटकादरसिकं परमकारुणिकाःश्रीकृष्णमिश्राः प्रबोधचन्द्रोदयाख्यनाटकव्याजेन तं बुबोधयिषवस्तद्रचयंति स्म ॥ तत्राद्यपदद्वये नांदासंज्ञके निर्विघ्नपरिसमाप्तये कृतं मङ्गलं निबध्नाति । मध्याह्नेति ।

पुष्पिकाः-

इति प्रबोधचन्द्रोदयव्याख्याने प्रकाशाख्ये प्रथमोङ्कः ।
" " " " द्वितीयोङ्कः ।
" " व्याख्याने प्रकाशाख्ये तृतीयोङ्कः ।
" प्रकाशाख्ये विवेकोद्योगो नाम चतुर्थोङ्कः ।
" प्रकाशाख्ये वैराग्यप्रादुर्भावो नाम पञ्चमोङ्कः ।

अन्तिमवाक्यम्-

इति निष्क्रान्ताः सर्वे इति ॥ अङ्कसमाप्तौ सर्वेषां निःक्रमणमित्यर्थः ॥ इति श्रीभट्टविनायकात्मजदीक्षितरामदासविरचिते प्रकाशाख्ये प्रबोधचन्द्रोदयनाटकाख्याने जीवन्मुक्तिनिरूपणं नामषष्ठोङ्कः ॥ ॥

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सप्राकृतं. संस्कृतमत्र किंचित् व्याख्याय तात्पर्यं (म) वर्णि किंचित् ॥ तत्राप्यशुद्धं यदि कचिदस्ति तच्छोधनीयं विबुधैर्न्न मूर्खैः ॥ शाके १६१३ ॥

प्रबोधचन्द्रोदयनाटकटीका (दुर्निरूपणपदार्थविवेकाख्या)

क्रमाङ्कः प्र. २९९

विषयाङ्कः ७८

ग्रन्थकारः रुचिकरः । नेपालीयं कागतम् । नेवारी लिपिः । पंक्तयः १२ । आकारः- १२$\frac{3}{4}$×५$\frac{3}{4}$ । ग्रन्थसंख्या ७०० । पत्रसंख्या २३ । अपूर्णा ।

पुष्पिका:-

इति रुचिकरविरचितायां दुर्निरूपणपदार्थविवेकाभिधानायां प्रबोधचन्द्रोदय (टीकायां) प्रथमोऽङ्कः

इति रुचिकरविरचितायां दुर्निरूपणपदार्थविवेकाभिधानायां प्रबोधचन्द्रोदयटीकायां द्वितीयोऽङ्कः ।

अन्त्यवाक्यम्-

तेन पातालं सा नीता विवाहसमयापेक्षया सा धृता सा स्वर्गस्थगन्धर्व्वसुता पातालस्थदैत्येन्द्रेण विवाहनीत्ये (ये) त्यसमञ्जसबुद्ध्या स्वकीयावे (पे) क्षायां असम्मत्या अग्निप्रवेशं कर्तुमुद्यता बभूव तदा तस्यै सर......व्या प्रोक्तं न दैत्येन्द्रे । अतःपरं खण्डितम् ।

प्रबोधचन्द्रोदयनाटकटीका (दुर्निरूपणपदार्थविवेकाख्या)

क्रमाङ्कः प्र. ३७३

विषयाङ्कः ७९

ग्रन्थकारः रुचिकरः । नेपालीयं कागतम् मैथिली लिपिः । पङ्क्तयः १० । आकारः- १०"×३$\frac{3}{4}$ । ग्रन्थसंख्या ५०० । पत्रसंख्या २८ । अपूर्णा । आद्यंकपत्रखण्डिता ।

प्रबोधचन्द्रोदयनाटकटीका (पदार्थविवेकनामनी)

क्रमाङ्कः ४०४

विषयाङ्कः ८०

ग्रन्थकारः रुचिकरः । ताडपत्राणि । मैथिली लिपिः । पंक्तयः ५।६ आकारः १५×२ । ग्रन्थसंख्या १५०० । पत्रसंख्या ८६ । ६अङ्कान्ता । समयः ने. सं. ७६८ ।

प्रबोधचन्द्रोदयनाटकटीका (पदार्थविवेकाख्या)

क्रमाङ्कः प्र. १०७७

विषयाङ्कः ८१

ग्रन्थकारः रुचिकरः । ताडपत्राणि । मैथिली लिपिः । पंक्तयः ५ । आकारः १४$\frac{3}{4}$×१$\frac{7}{8}$ । ग्रन्थसंख्या २४०० । पत्रसंख्या ११४ । पूर्णा ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

आदिवाक्यम्-

ॐ नमो श्रीगणेशाय ॥ तत्रादौ तावत्सर्व्वविद्याविदग्धः सकलशास्त्रविशारदः सकलवेदवेदान्ततत्त्वज्ञः सकलभाषाचतुरः सकलरसविशेषज्ञः संसारस्वर्गसुखविमुखो मुमुक्षुर्म्महाकारुणिकः कृष्णमिश्रः स्वविज्ञतां प्रकाशयन्सकलविद्यास्वरूपंनिरूपयन्दुःखमयसंसारसागरनिमग्नसकललोकमुज्जिहीर्षुर्न्नाटककौतुकव्याजेन शृङ्गारादिरसोपदर्शनेन रभसमुत्पादयन्सकललोकान्प्रत्यक्षीकृत्य वेदान्तसिद्धान्तम्बोधयितुं शान्तरसप्रधानं प्रबोधचन्द्रोदयाभिधानं नाटकमारभमाणो नान्दीश्लोकमवतारयति । मध्याह्नार्केत्यादि ।

अन्त्यवाक्यम-

श्रीचन्द्रसिंह(स्य)नृपस्य वाक्यः प्रबोधचन्द्रोदयनाटकस्य । ग्रन्थाननेकानुपजीव्य यत्नाट्टी-(का) कृतेयं रुचिनात्मबुद्धया ॥ नमस्कारांञ्जलिम्मौलौ निधायाभ्यर्थये सतः । मनागालोचनेनायं सफलः क्रियतां श्रमः ॥ सन्दश्यते सज्जनदृष्टिपूतं सर्व्वम्भवेल्लोकपरिग्रहाय । टीका तदेषा मदनुग्रहेण सद्भिर्म्मनागप्यवलोकनीया ॥

प्रबोधचन्द्रोदयनाटकटीका (पदार्थविवेकाख्या)

क्रमाङ्कः प्र. १४६२ **विषयाङ्कः ८२**

ग्रन्थकारः रुचिकरः । मध्यदेशीयं कागतम् । मैथिली लिपिः । पङ्क्तयः १० । आकारः १०$\frac{5}{8}$×४$\frac{5}{8}$ । ग्रन्थसंख्या १२०० । पत्रसंख्या ४४ । मध्यखण्डिता । अपूर्णा ।

प्रबोधचन्द्रोदयनाटकटीका

क्रमाङ्कः प्र. १४७७ **विषयाङ्कः ८३**

ग्रन्थकारः …… । नेपालीयं कागतम् । नेवारी लिपिः । पङ्क्तयोऽनियताः । आकारः-१०$\frac{5}{8}$×४ । ग्रन्थसंख्या १४०० । पत्रसंख्या ४७ । अन्त्यखण्डितम् ।

प्रभावतीहरणनाटकम्

क्रमाङ्कः प्र. ३९५ **विषयाङ्कः ८४**

ग्रन्थकारः जयजगत्प्रकाशमल्लः । नेपालीयं कागतम । नेवारी लिपिः । पंक्तयः ८ । आकारः ९$\frac{1}{4}$×३$\frac{5}{8}$ । ग्रन्थसंख्या ६०० । पत्रसंख्या ४४ । समयः ने. सं. ७७६ ।

आदिवाक्यम्—

ॐ नमः श्रीनाट्येश्वराय । नान्दीगीतं । राजविजय चो । प्रथम हि सुमरजो गुरुगणेश देथु अभय वर हरथु कलेश ॥ कर तिरशुर डमरु ॥ मणिहार प्रेमघरि अशिवअरधङ्गदारनन्दिभृङ्गि सेङ्गनृरित विहार औति ईसर सुन्दर वाघछाल ॥ चाँद तिलक जटा निरमल गँगा त्रिभुवन ठाकुर भूषण भुजङ्गा ॥ तोहहिसावन मारमनभाव जगतप्रकाशः रूपकौके गावः ।।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पुष्पिकावाक्यम्—

इति प्रथमाङ्कः । इति द्वितायाङ्कः ।

इति श्रीश्रीजयजगत्प्रकाशमल्लकृते प्रभावतीहरणनाम नाटकं समाप्तम् ॥ ॥

समयः—

नेपालाब्दे रसाश्वाश्वे गणिते कामवासरे आषाढे बहुले पक्षे ग्रन्थः संपूर्णतामगात् ।

भाषानाटकम् (नाटकीयगीतसंग्रहो वा) नेवारभाषासहितम्

क्रमाङ्कः प्र. १४५५ विषयाङ्कः ८५

ग्रन्थकारः-जयभूपतीन्द्रमल्लः । नेपालीयं कागतम् । नेवारी लिपिः । पङ्क्तयः ८ । आकारः-९$\frac{८}{८}$×५$\frac{८}{८}$ । ग्रन्थसंख्या २१५ । पत्रसंख्या २२ । समयः-ने.सं. ८१५ । पूर्णम् । अत्र पत्राङ्क-१७ पर्यन्तमेकः संग्रहस्ततः परं चान्य इति ।

भैरवानन्दनाटकम्

क्रमाङ्कः प्र. १०७८ विषयाङ्कः ८६

ग्रन्थकारः-मणिकः ।ताडपत्राणि । नेवारी लिपिः । पङ्क्तयः ४ । आकारः-८$\frac{३}{५}$× $\frac{५}{८}$ । ग्रन्थ-संख्या ६५० । पत्रसंख्या १०० । अपूर्णम् ।

आदिवाक्यम्—

ॐ नमो नाटेश्वराय ॥ त्रिपुरद(नु)जं हत्वा नृत्यन्महेश्वरनायके प्रवरमुनिभिर्देवै(र)हृष्यन्मनोभिरभीक्षिते । नयनसुभगा नाट्य याभूत् महोत्सवकारिणी भवतु सततं सेयं सिद्धिर्म्ममापि च तद्वती ॥ अपिच ॥ प्रकीर्णः कामारेरमरनिकरैरङ्घ्रियुगले विलोलालिः कल्पद्रुमकुसुमपुष्पाञ्जलिरयम् । विभूत्यै भूयद्वः पितृविपिनभस्माङ्कितवनोर्न्निशानाथज्योत्स्नामिलितमुकुटस्येष्टफलदः॥ अपिच ॥ स्मृत्वा यं प्रतिवासरन्निजसखीवृन्दस्य शैलात्मजा स्थित्वाग्र निजलीलयानुकरणं यस्याकरोदुन्मनाः । वेशालंकरणोक्तिगीतिगमने देवार्च्चने नर्त्तने सोऽयं श्रीमदनान्तकः पशुपतिः कुर्याच्छिवं वः सदा ॥ ॥ ततः प्रविशति ना(न्)द्यन्ते सूत्रधारः॥ पुष्पाञ्जलि(म)भिनीय ॥ धर्म्मादिजीवन्मुक्त्यन्तपञ्चवर्गप्रदायिने । योगिनां ज्ञानगम्याय नमोऽस्तु परशम्भवे ॥ अग्रतोवलोक्य ॥ अलमतिपल्लवे(विते)न यदहमादिष्टोस्मि भगवत्पशुपतिचरणकमलोपचारचतुरेण विकरालंकरवालकालानलकवलिकेलिलीलाकलापकवलितारातिवंशेन नयविनयगुणगरिमगाम्भीर्यमर्यादार्ण्णवेन प्रणतनृपमौलिमालावघृष्टपादपङ्कजेनरघुवंशचक्रचूडामणिना राजल्लदेवि(वी)रमणेन श्रीमता श्रीश्रीजयस्थितिराजमल्लदेवेन ॥ यएषः ॥ उद्दण्डक्षितिपालमण्डनमणिः सन्म(साम)न्तचूडामणिः सवज्ञानमणिः स्वधर्म्मम(स) रणि(रमणिः)सूर्यान्वयग्रामणीः । विश्वप्राणमणिः विशेषविदुषसन्मानपूजामणिः श्रीमच्छ्रीस्थितिराजमल्लनृपतिः सर्वार्थचिन्तामणिः ॥ अग्रतावलोक्य॥

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अये विविधगुणगणालङ्कृतस्यैव नेपालेश्वरस्यातिमनोहरा परिषदियम्। वि(निर्)वर्ण्य ॥ यस्यामय श्रीजयधर्म्ममल्लो राजल्लदेवीहृदयैकसूनुः ॥ विद्वज्जनानन्दककल्पवृक्षो गुणौघपद्माकरराजहंसः ॥ ॥ अपिच ॥ प्रत्यर्थिपृथिवीपालकुमुदाकरभास्करः। वालनारायण(:) श्रामाञ्ज्योति(र)मल्लो विराजते ॥ नेपथ्याभिमुखमवलोक्य ॥ तत्किमिदानी(म)ति विलम्ब्यते गृहिण्या ॥ प्रविश्य नटी ॥ अज्जउत्त इअं अम्हि आअदा किमादिठ्ठोसि देशराइणा ॥ सूत्र ॥ प्रिये इदमादिष्टोस्मि यदद्यासी(?)सूनोः कुमारश्रीश्री जगधर्म्ममल्लदेवस्य रघुवंशोचिताचारसम्भारविवाहमहोत्सवदर्शनोत्सुकानान्ना(नां)दिग्देशागतानां सामन्तपात्राणां समाजः श्रीनाटे(ट्ये)श्वरवरलब्धनाट्यवेदविशारदस्य राजबर्द्धनस्य सूनोः श्रीगुरुचरणमुद्राङ्कितमस्तकस्य मणिकनामधेयस्य कवेः कृति(ते)र्भैरवानन्दनाटक(स्य)दर्शनाकांक्षा वर्त्तते। तत्त्वया भरतपुत्रकुशीलवैः सह संगीतमनुसृत्य यथावत्प्रयोगेन(ण)नाटयितव्यमिति ॥

अन्त्यवाक्यम्–

कु ॥ प्रिये इन्दुमति ॥ इन्दु ॥ णाह किं आणवेदु ॥ कु ॥ अतः परमपि प्रियमस्ति अयोनिसम्भवा सेयं सम्प्राप्ता मदनावती। दुष्ट(:)कापालिक(:) सोपि शिष्यद्रोही निपातितः ॥ प्रिये मदनावति प्रिये इन्दुमति ॥ तुरङ्गमारुह्यास्मद्राजधानीङ्गच्छामः ॥ उभे एवं गच्छम्ह ॥ निष्क्रान्तः(ताः) ॥३६॥ ततः प्रविशति ॥ राजा धर्म्मादित्य(:) कमलावती च ॥ देवि कमलावति ॥ कमला ॥ आणवेदु महाराओ ॥ धर्म्मा ॥ अद्य रात्रौ सुस्वप्न(प्नः) मया दृष्टोस्मि(स्ति) ॥ ततःप्रविशति ॥ कुमार. क्रमादित्य(:) मदनावती इन्दुमती च ॥ कु ॥ ताताम्ब प्रणमामि ॥ सर्व्वे पुत्र विजयी भव ॥ परस्परमालिंग्य ॥ सहर्षम् ॥ ······ अतःपरं खण्डितम् ॥

पुष्पिकावाक्यानि—

प्रथमाङ्कः ॥ ॥ ?

इति प्रथमोङ्कः ॥ ॥

इति पञ्चमोङ्कः समाप्तः ॥

षष्ठोङ्कः ॥ :

मदनचरित्रकथा (नेवारभाषामयी)

क्रमाङ्कः प्र. ३६५ विषयाङ्कः ८७

ग्रन्थकारः–रणजितमल्लः 'नेपालीयं कागतम्। नेवारी लिपिः। पङ्क्तयः ७। आकार. ९×२$\frac{3}{8}$। ग्रन्थसंख्या ७०। पत्रसंख्या ७। १ अङ्कात्मिका।

आदिवाक्यम्—

श्री ३ नृत्यनाथाय नमः ॥ ॥ मदनराजा रतिकारिणी दिव्यचक्षुर्मन्त्रि प्रवोधकोट पसार

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पृथिवा चलुमा ॥ तोडि ॥ चो ॥ प्रियसिन् अनस भायात वनेथनि ॥ध्र ०॥ अपुरुव रंगरे गेयापर सकलावान सवजन मुनेभिदुथान ॥ मेपु ॥ १ ॥

पुष्पिकावाक्यानि—

इति मदनचरित्रकथा प्रथमोङ्कः समाप्त ॥ शुभः दीर्घायुः ।

मदालसाहरणम् (नेवारभाषायुतम्)

क्रमाङ्कः प्र. ३५४ विषयाङ्कः ८८

ग्रन्थकारः सुमतिजयजितामित्रमल्लः(?) ।नेपालयं कागतम् । नेवारी लिपिः । पङ्क्तयः- ५ । आकारः ६$\frac{३}{४}$×३$\frac{१}{४}$. । ग्रन्थसंख्या १६० । पत्रसंख्या ३० । समयः ने. सं. ८०७ । पूर्णम् । अत्र सर्वत्र तालप्रस्तारभेदा विशेषतो दर्शिताः ।

आदिवाक्यम्—

ॐ श्री ३ नाटेश्वराय नमः ॥ ॥ देवल्हाय ॥ झाक ॥ धायं जिगि ३ तकुं तुकुं धाराजि धाराजि धाराजि तकुं नकुं धाः धवा ३ ॥ तह ॥ टाझेटा झेटा झे नकझे तुं तुं डा झेटा तुं छचा तुं डा झे देवल्हाय ॥

अन्तिमंवाक्यम्—

अथिरकरे इत्यादिमे ॥ मेपु ४५॥ तह डुं टाझेनकझेडा ॥ इतिमदारसाहरणभारदी(ति) समतनामनाटक संपूर्णः समाप्तः।

मनोनुरञ्जनं नाम नाटकम्

क्रमाङ्कः तृ. ७५६ विषयाङ्कः ८६

ग्रन्थकारः—अनन्तदेवः । नेपालीयं कागतम् । देवनागरीं लिपिः । पङ्क्तयः १३ । आकारः— १२$\frac{३}{४}$×६$\frac{५}{८}$ । ग्रन्थसंख्या १२०० । पत्रसंख्या ३८ । पूर्णम् ।

आदिवाक्यम्—

श्रीगणपतये नमः ॥ श्रीसरस्वत्यै नमः ।श्रीमदापदेवचरणारविंदाय नमः॥ कालिन्दीपुलिने सुगन्धिपवने मन्दारमूले लसन्नीलेन्दीवरसुन्दरः कटीतटप्रद्योतिपीताम्बरः । कोपि श्रीमुखमारुतेन मुरलीमालापयन्मञ्जुलं लीलाक्षारभिरञ्जयन्विजयते कंजस्फुरल्लोचनः ॥१॥ अपिच ॥ यस्यामी विधिवासवादिविबुधावासेषु विष्फूर्ज्जिताः सन्तोपाश्रलवीचयोनृपसुखान्यैतान्यथोवुद्बुदाः ॥ अन्ये पुत्रकलत्रमित्रविषयाः सौख्योदयाविन्दवः सोयं पूर्णसुखार्णवो विजयते नीलाम्वुदश्यामलः ॥२॥ नान्द्यन्ते सूत्रधारः अलमलम् अद्य खलु नानाश्रुतिस्मृतिपुराणादिवचनशतैरप्यवचनीयेन चतुर्मुखशतमखप्रमुखसुरैरपि सततमाराधनीयेन सनकसनंदनसनातनादिभिरतिकृतार्थैरप्यनुचिन्तनीयेन त्रिभुवनपतिमोहनप्रकृतिकमनीयेन श्रीनारायणेनांतर्यामिणा प्रेरितोस्मि ॥ यदुत ॥ हरिभक्तिरसप्रधानं कमपिनिबंधमद-

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नुबन्धिषु साधुषु विशदमभिनीय प्रदर्शयति ॥ दिव्यचक्षुः प्रसार्य सानन्दम् ॥ अहो यत्र शतैरप्यलभ्या समागता एव सभ्याः ॥ उपविष्टा एवैतेऽस्मत्कलावलोकनसमुत्सुकैरितरलोकैः साकम् तदस्मदीय संतोष एवामीषामुद्देश्यः ॥ यतः ॥ न विदन्ति परस्यभिन्नतां स्वयमस्याकलयन्ति खिन्नतां ॥ सुखसंततये च संततं प्रयतन्ते कृपणेषु साधवः ॥३॥ तदिमे कृपणानस्माननुगृह्णन्ति ॥ प्रविश्य नटोः ॥ किमिदमकाण्डे कृपणतावम्बवनम् ॥ तथाहि ॥ कदापि नैव स्वपदाच्चलन्ति ये साधव अधं यमहामहीध्राः ॥ तन्मस्तकान्दोलनशक्तिभाजो भवादशाः किं कृपणा भवन्ति ।।४।। सूत्रधारः ॥ ॥ अलमलं विवक्षिता (त) मेवोच्यताम् ॥नटः॥ सविनयम् ॥ विवक्षितमे तदेव ।। यदावाभ्यामिह सभ्यानुरञ्जनम् विधेयम् ॥ तत्केन साधनेनेति ॥ सूत्रधारः ॥ ये न जानासि शृणु ॥
अधुनानन्तकविनामधुना तुलनास्पदं ॥ अन्वबन्धि निबन्धोयं हरिभक्त्यनुबन्धिना ॥५॥
नटः ॥श्लोकंपठन् ॥ अयेनुपक्रमएव मधुसंमितः प्रक्रम्यते ॥ सूत्रधारः ॥ कः संशयः ॥

स्वभावरमणीयानां स्पृहणीय(यो)नुपक्त(क्र)मः ॥
यथारतिसमारम्भे कान्तावदनचुम्बनम् ॥६॥

नटः ॥ पुनःपुनरुच्चैर्हसन् ॥ तदेव ॥ यरतिसमारम्भे कान्तावदनचुम्बनम् ॥ सूत्रधारः ॥ अलमलम् ॥ न वेत्सि महत्समाप्रवेशसवेशम् ॥

महत्समाजे हसितं दधाननुरागवृद्धया वत भूरिवारम् ॥
जनःसमायाति किलापमानायाति भूयः स सभासु धाम ॥७॥

नटः ॥ सविनयम् ॥ अये किन्ना कमिदं नबन्धनम् ।। सूत्रधारः।। अत्रैव श्लोके चतुर्षु चरणेषु प्रथममंत्यमिति क्रमेण मिलिताक्षरैर्दत्तमस्योत्तरम् ।।नटः॥ अहो विदितम् ॥ मनोनुरंञ्जनं नाम निबन्धनम्॥ फलमपि चैतन्निबंधं भविता ॥

अन्त्यवाक्यम्—

अत आज्ञेति नमस्कृत्य सर्वे निष्क्रान्ताः भगवानपि गोदोहेन समयमनुसंधाय निःक्रान्तः॥ इत्यनन्तकविना विनिर्मितं श्रीपतेगु णगणैरलंकृतम् । साधुसंसदि मनोनुरञ्जनं नाम नाटकमिदं प्रवर्ततम् ॥१०६॥

शास्त्राणां परिशीलनैर्भृशमहो शिष्येचाध्यापनैः ख्यात्युद्देशकृतै बंभूत्र बहुधा दंदह्यमानं मनः । पुण्यैरेब तु संप्रति प्रपदं गोविंद तत्तद्गुणा श्लाघासौधपयोधि वीचिनिचयेष्वानन्दमाविन्दति ।।१०७।। सहित्यसंगीतकलास्वभिज्ञो जनः प्रसीदेन्न तथा न किंचित् । तथापि गोविन्दकथारसज्ञा यथाकथंचित् सुखिनो भवंतु ॥१०८॥

केचित्प्रशंसन्तु हसन्तु केचिन्न मे प्रसादो न च मे विषादः ।
परंतुगोविन्दपदारविंदप्रियाः प्रसि(सी)दन्तु निबन्धनेस्मिन् ।।१०९।।

इत्येषा वाङ्मयी पूजा श्रीमद्गोपालपादयोः ।
अर्पिता तेन मे देवः प्रीयतां भगवानसौ ।।११०।।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पुष्पिकावाक्यानि—

इति श्रीमदापदेवसूनुनाऽनन्तदेवेन विनिर्मिते मनोनुरञ्जनाभिधाने हरिभक्तिनाटके इन्द्रमखभङ्गो नाम प्रथमोऽङ्कः।

" द्वितीयोऽङ्कः।

" तृतीयोऽङ्कः।

" चतुर्थोऽङ्कः।

" पञ्चमोऽङ्कः।

मलयगन्धिनी नाटकम् (नेवारभाषायुतम्)

क्रमाङ्कः प्र. ४३६ विषयाङ्कः ६०

ग्रन्थकारः (जगत्प्रकाशः ?)। नेपालीयं कागतम्। नेवारी लिपिः। पङ्क्तयः ६। आकारः ८½×३। ग्रन्थसंख्या ७५०। पत्रसंख्या ८५। अपूर्णम्।

आदिवाक्यम्—

ॐ नमः श्रीनाटेश्वराभ्यां॥ पद्मोद्भवमा॥ राजविजय॥ जति॥ चंपकमालतीरूपत्रिभुवन सारे पेमवसे एकतनु मेलहु विहारे॥ शिवक तिरेकधर निरमर चन्दा यद(पद)जुगकोमल तुभु अरविन्दा॥ त्रिलोक नाचय हरगौरिहिंसाथे अहिपतिगण जत वर एहि हाथे॥ श्लोक॥ याद्भिर्जीरकणायिकं(तं)हरजटाजूटेषु याश्चिन्तयन्। भक्त्या पञ्चभिराशुगैर्विजयते दर्पाज्जगद्दर्पकः॥ या घर्मद्रविणाभिलाषशशभृच्चूडाद्रिवासु(स)प्रदाः। प्रालेयाचलकन्यका(च)रणयोस्ता धूलयः पान्तु च (पान्तु वः)॥ ॥

पुष्पिकावाक्यानि—

इति प्रथमाङ्कः। इति द्वितीयाङ्कः।

अन्त्यवाक्यम्—

सर्वो हमराहु सवहिका एहे मनोरथ॥ परमेश्वरीयाभावमे॥ ॥ अतःपरं खण्डितम्

महाभारतनाटकम् (नेवारीभाषायुतम्)

क्रमाङ्कः प्र. १४७८ विषयाङ्कः ६१

ग्रन्थकारः जयजितामित्रमल्लः। नेपालीयं कागतम्। नेवारी लिपिः। पङ्क्तयः ६। आकारः ६⅞×४⅞। ग्रन्थसंख्या ४०००। पत्रसंख्या १२८। समयः ने. सं. ७९६। पूर्णम्।

आदिवाक्यम्—

ॐ नमः श्रीनाटेश्वराय॥ नान्दीमे॥ गौडामालव ॥ जति, परिमान, एक॥ सकलस्वरूप हर तिनिनयन नुअ। रवि शशि अनल हु तूल। धवलवरण तनुछा उरे भापल हु। जटापर

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अर्घचन्द्र मूल ॥ त्रिशूल डमरु धर त्रिलाक हिशिरिजल त्रिपथ हि वस धरातोरा चरण-सरोरुह जे जन सेवय तत हि कल्यान(ण) कर भोरा ॥ गिरिसुतासंयुत गणेशसहित सुत मनदयबर देह तोहे। प्रथम नान्दि गाय अपने नाचल शिव भमिते भमय बड सोहे ॥ जगतचन्दकृतगितपरिशोभन हरषुथु देखि देखि रोगे। जितामित्र उग्रमल्ल चिरंजीव हों-अथु सहस्र वरिष करु भोगे ॥ ॥ नान्दीश्लोक ॥ जातं पाणिधृतिप्रसंगसमये प्रोक्ते ततोगौदिकंठच्चैर्मन्त्रगणे शिवाशशिभृतोस्फीतं विवाहोत्सवे । आनन्दाम्बुनिधि क्षणा-पतितरामुद्वेलयन्तो मिथः पान्तु ह्रीविजिता जगत्त्रयमतिस्निग्धाः कटाक्षप्र(व्र)जाः ॥ ॥

अन्त्यवाक्यम्—

पृथ्वी शस्यवती भवत्वभिमता राजा च लोकप्रियो लोकाः पुण्यरता यशः समुदिता विप्रा-ज्यपूजाशयाः। गावः क्षीरवहा भवन्तु सततं राष्ट्रे मुदा पावने राज्यं पालयतो नृपस्य सहसा सिद्ध्यन्तु कर्मव्रजाः ॥ श्रीश्रीजितामित्रमल्लदेवस्य तथा श्रीश्रीउग्रमल्लदेवस्य सप्ताङ्गराज्यवृद्धिरस्तु॥सर्व्वे तथास्तु। अथिखरेत्याबि। इति महाभारतनाटकसमाप्तम् ॥ संवत् ७९६ पौष शुदि १२ शुभम्।

महीरावणवधोपाख्याननाटकम्

क्रमाङ्कः तृ. ३६२ विषयाङ्कः ६२

ग्रन्थकारः पंडितश्रीजयतः। ताडपत्राणि । भुजिमलाक्षरम् नेवारी लिपिः। पंक्तयः ५-६। आकारः १२३/४″×१½″। ग्रन्थसंख्या ५००। पत्रसंख्या २७। मूषिकदष्टम् ।

आदिवाक्यम्—

ॐ नमो नाट्येश्वराय ॥ स्वेच्छ विभ्रमजृम्भमाणमहिमागंभीरभीमप्रभो लक्ष्मीमुख-मुखेन्दुपानपटिमाभ्राजच्चकोरापरः। विश्वाव्यापिविशुद्धकीर्त्तिकुमुदामालार्म्मलाडम्बरः (?) सानन्दं(:) भगवान् त्रिलोकशरणं नारायणः पातु वः ॥ अपिच । स्फूर्त्कृद्ध्रोगि-कुलाश्रु मिश्रजलधेः पातालमूलालयात्(द्)गर्ज्जद्घोरकठोरघोणकुलिशप्रोत्तुंगदंष्ट्रांकुरः। मज्जद्भूमितलं धृतं करुणया कोलेन लीलायितं स्थित्यर्थम्भुवनत्रयस्य शिरसा वन्दे मधून(मू)रिपुम् ॥ नान्द्यन्ते सूत्रधारः॥ श्रीबु (वू) गेशमहं नमे शतमखं वैश्वानरं पावनं पाथेगञ्ज नमामि नमृशिरस प्रताधिन थन्नमे। नैऋत्येशमतोबरञ्ज पवनं············महं भवस्य सु(शु)भदं सर्व्वात्मना स्तौम्यहम् ॥ मये कथं संभारद्वयसंभूतपावनीयमूर्त्तिः(र्त्तेः) सकलजनापवर्गप्रतिष्ठापनप्रतिज्ञा··· ··· ······रभावनाप्रतिसरणस्य भगवतः श्रीबुगेश्व-रस्याप्रतिहतप्रतिशरत्(द्)यात्रोत्सवप्रसंगेनायात्रा(ता)णां(नां) प्रमुदितद्विजराजपु-त्रादीनां समाजः ॥ इह हि ॥ श्रीमत्पात्रपवित्रसूर्यनिवहाः सत्कीर्तिभोजार्णवाः एते शास्त्र-विशारदा द्विजगणाः श(स)त्वार्थगाढाशयाः। एते साधुजनाः प्रदानसुमुखाः शीलाम्बरा-लंकृता विद्वद्वर्गवराः श्रुतादिपटवो भान्ति ध्रुवं स्वस्ति ते ॥ आकाशे क(र्)णनन्दत्वा।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

किमादिशन्ति सन्तः । सकलसीमन्तिनीकर्णावतंस सकलार्थिमुखकमलकुड्मलप्रबोधभास्करविविधविद्याविवेकसागरावगाहनपण्डितप्रत्यर्थिपार्थिवमत्तकुंजरदमनांकुश उत्तर विहारमहापात्रपद्मैः समादिष्टोसीति सभासभासंरञ्जनार्थम् । स्मरणमभिनीय ॥ अस्ति च कवेः कविकमलभास्करस्य जयतस्य कृतिरभिण(न) वमहीरावणवधानामनाटकः (कम्) प्रवर्त्तयितव्यः (व्यम्) ॥यतः॥ उपस्तंभाय पात्राणां दिनैस्ताण्डवमष्टभिः । यदि (दी)हदूषणं हन्तः क्षन्तव्यं धीधनैः क्षमैः ॥ बलमतिविस्तरेण ॥

अन्त्यवाक्यम्—

रामः ॥ एतदस्तु ॥ बृष्टिं ददातु जलदोऽस्तु सुखी(खिनी) प्रजा च राजा स्वधर्म्मनिरतः करुना(णा)(र्)द्रचेताः । रक्षोगणो विविधशस्यधरा धरा च शोकादिदुःखविपदोपि ग्रहां(गुहां) प्रयान्तु ॥ इति सर्व्वे निष्क्रान्ताः ॥ ॥ भग्नरा(ज्)य(स)थापनाचार(र्य)स(श)रणागतवज्रपञ्जरमत्तकुञ्जरदमनाङ्कुशउत्तरविहारकुटुम्वजश्रीन्होल विहारप्रधानाङ्गमहापात्रश्रीजयशीहमल्लवर्मनां(णां) कुतूहलपूरणाय कविकमलभास्कर पण्डितश्राजयतविरचितौ महीरावणवधोनामनाटकः परिसमाप्तः॥ ॥

सप्तपञ्चाशताधिक चतुरशत ॥श्रेयोऽस्तु॥ सम्वत् ४५७ श्रावणकृष्णद्वादश्या ॥ पुष्यनक्षत्रे॥ परिचयोगे ॥ शनिश्चरे ॥ ॥ वासरे पुस्तकमिदं समाप्तमिति ॥ ॥ परमभट्टारकपरमेश्वरपरमवैष्णवपरमदैवताधिदेवपरममाहेश्वररघुकुलतिलकभूपालपरंपरापरिणमितमौलिशिषाप्रसूनसन्धूपितपादारविन्दश्रीपशुपतिदेवतावरलब्धप्रसादेव महाराजाधिराज सप्रक्रियराजराजेन्द्रश्रीश्रीजयारिमल्लदेवनाम्विजयराज्ये नेपालमण्डले ॥ ॥ न चाहं शास्त्रकर्ता च न च शब्दार्थचिन्तकः । यादृशं स्थितमादर्शे तादृशं लिखितं मया ॥ उतरविहारकुटुम्वोद्भवश्रीन्होलविहारप्रधानाङ्गमहापात्रश्रीजयशीहमल्ल वर्म्मणे सत्वार्थहेतुना स्वहस्तेन लिखितम् ॥ ॥ वालमूर्खविदेशस्थ वारितैलाग्नि तस्करात् । रक्षितव्यं यथाशक्ति पुस्तिका स्वस्तिकारिणी ॥ भग्नपृष्ठिकटीग्रीवस्तब्धदृष्टि(र्)अधोमुखः । दुःखेन लिखितं शास्त्रं पुत्रवत्प्रतिपालयेत् ॥ ॥

माधवानलनाटकम् (नेवारीभाषायुतम्)

क्रमाङ्कः प्र. १४५५ **विषयाङ्कः ९३**

ग्रन्थकारः भूपतीन्द्रमल्लः । नेपालीयं कागतम् । नेवारी लिपिः । पङ्क्तयः ७ । आकारः $१०\frac{५}{८}\times४\frac{१}{२}$ । ग्रन्थसंख्या ६५० । पत्रसंख्या ५७ समयः ८२४ । मध्येपत्रद्वयं खण्डितम् ।

आदिवाक्यम्—

श्रीश्रीश्रीनाटेश्वरायै(य)नमः । नान्दीश्लोकः । कुण्डलीशकृतकुण्डलोदिभुः खण्डितः(त) प्रखरदैत्यमण्डलः । चण्डिकापतिशशाङ्कःशेखलं(रः) पातुवो नटननायको मुदा ॥नान्दिमे॥ श्रीराग ॥ ज. रू. थ. अ. अ. प्र. ए. प. ल. ॥ जयजय शंकर रजतधवलनवलरूपे आरे । फणियुगकुण्डल कयल तिलक शशि तोह हि त्रिभुवनभूपे दुर कर भवभयतापे ॥ध्रु।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पुष्पिकावाक्यानि—

इति प्रथमोङ्कः । इति द्वितीयोङ्कः ।

इति श्रीश्रीभूपतीन्द्रमल्लविरचितमाधवानलनाटके तृतीयोङ्कः संपूर्णः । संवत् ८२४ पौष वदि २ शुभम् ॥

मान्धात्र्युपाख्यानम् (नेवारीभाषायुतम्)

क्रमाङ्कः प्र. ३६५ विषयाङ्कः ९४

ग्रन्थकारः जयरणजितमल्लदेवः । नेपालीयं कागतम् । नेवारी लिपिः पङ्क्तयः ८ । आकारः १०$\frac{3}{2}$×४ । ग्रन्थसंख्या ९०० । पत्रसंख्या ५३ ।

आदिवाक्यम्-

श्री ३ नृत्यनाथाय नमः ॥ ॥ आदौ नान्दीश्लोकः ॥ सानन्दं हिमकुन्दकैरवसुधा हिण्डीरपिडच्छविस्तारानायकशेखरो गिरिसुतावामाङ्गसंशोभितः । शूली भूतिविलेपित स्सुरनुतो गङ्गाधरः कामदो व्याघ्रत्वक्परिवीतसुन्दरकटिर्नृत्येश्वरः पातु वः ॥ ॥ ततो नान्दीगीतं ॥ ॥ हिमगिरिनन्दिमा ॥ कामोद ॥ जल अएथ पप्र ॥ जय २ शशधरतिलक महेश पूषण ए । अनल हिमकर त्रिनयन शोभित भोगिभूषण ॥ शिव शितिकण्ठ नटेश ॥

पुष्पिकाः-

इति प्रथमोङ्कः

इति द्वितीयोऽङ्कः

इति तृतीयोंऽङ्कः

इतिचतुर्थोऽङ्कः

इति श्रीमत्पशुपतिचरणकमलेत्यादि श्रीमहाराजाधिराजश्रीश्रीजयरणजित्मल्लदेवविरचिते मान्धात्र्युपाख्याननामनाटके पञ्चमोऽङ्कः समाप्तः ॥

सं. ८७८ भार्गव ७ शुभमस्तु । सं. ८८४ ज्येष्ठवदि २ चोय धुनका ॥ ॥ शुभम् ।

मालतीमाधवनाटकम्

क्रमाङ्कः प्र. १५८५ विषयाङ्कः ९५

ग्रन्थकारः भवभूतिः । ताडपत्राणि । मैथिली लिपिः । पङ्क्तयः ४ । आकारः १४$\frac{1}{2}$×१$\frac{1}{2}$ । ग्रन्थसंख्या १२०० । पत्रसंख्या ७८ पूर्णम् । समयः लक्ष्मण सं. ४६९ मार्गशुक्लद्वादश्याम्

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मालतीमाधवनाटकम्

क्रमाङ्कः प्र. ५०५ विषयाङ्कः ९६

ग्रन्थकार भवभूतिः। नेपालीयं कागतम्। मैथिला लिपिः पङ्क्तयः ५। आकार: १२$\frac{3}{4}$×२$\frac{1}{2}$ ग्रन्थसंख्या १२००। पत्रसंख्या ५७। आद्यन्तखण्डितम्।

मालतीमाधवनाटकम्

क्रमाङ्कः प्र. १०३३ विषयाङ्कः ९७

ग्रन्थकार: (भवभूतिः)। नेपालीयं कागतम्। नेवारी लिपिः। पङ्क्तयः ८। आकार: ८$\frac{1}{2}$×४$\frac{1}{2}$। ग्रन्थसंख्या १३००। पत्रसंख्या ७८। मध्यान्तखण्डितम्।

मालतीमाधवनाटकम्

क्रमाङ्कः प्र. १४७३ विषयाङ्कः ९८

ग्रन्थकार: भूगर्भः (भवभूतिः)। ताडपत्राणि। नेवारी लिपिः। पङ्क्तयः ८। आकार: १२×२। ग्रन्थसंख्या १३६१। पत्रसंख्या ३९। समयः सं. २७६। १० अङ्कान्तं पूर्णम्।

आदिवाक्यम्—

नमः सर्वज्ञाय। सानन्दं नन्दिहस्ताहतमुरजरवाह्नि(इभी) तकौमारबर्हित्रासान्ना(सा) ग्ररन्ध्रं विशति फणिपतौ भोगसंकोचभा(जि) ॥ गण्डोड्डीनालिमालामुखरितककुभ-स्ताण्डवे शूलपाणे र्व्वेणा(ना)यक्यश्चिरम्वा वदनवि(धु)तयः पान्तु चीत्कारवत्यः ॥

पुष्पिकावाक्यानि—

वकुलवीथीनाम प्रथमोऽङ्कः समाप्तः

धवलगृहोनाम द्वितीयाङ्कः।

(शं)संकरगृहोनाम तृतीयोङ्कः।

रथ्यापरिक्रमो नाम चतुर्थोङ्कः।

श्मशानपरिक्रमो नाम पञ्चमोङ्कः।

लय(लेय)गृहोनाम षष्ठोङ्कः।

वासगृहोनाम सप्तमोङ्कः।

" अष्टमोङ्कः।

उन्मत्तमाधवो नाम नवमोङ्कः।

उपसंहारो नाम दशमोङ्कः।

अन्तिमं वाक्यम्—

निष्णातश्च समागमश्च विहितः त्वं प्रेयसः कान्तया। संप्रीतौ नृपनन्दणौ(नौ) ध्रुवपरं कार्य

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तदप्युच्यतां ॥ माधवः ॥ अतः परमपि प्रियमस्ति ॥ तथापि इदमस्तु (इति निष्क्रान्ताः दशमोऽङ्कः समाप्तः ॥) सन्तः सन्तु निरन्तरं सुकृतिनो विध्वस्तपापोदया राजानः परिपालयन्तु वसुधां धर्मे स्थिता सर्वदा ॥ काले सन्ततवर्षिणो जलमुचः सन्तु प्रजापुन्य(ण्य)तः मोदन्तां घनवद्धवान्धवसुहृद्गोष्ठीप्रमोदाः प्रजाः ॥समाप्तमिदं मालतीमाधवाख्यं नाटकम् कृतिरियं महाकवेभूवभूतेः ॥ सं २७६ अश्विणि(आश्विन) शुक्लपञ्चम्यां शुक्रदिने लिखितमितिश्रेयः ।

मालतीमाधवटीका

क्रमाङ्कः च. **विषयाङ्कः ६६**

टीकाकारः— प्रजापतिः । ताडपत्रां नेवारी लिपिः । पङ्क्तयः ८ । आकारः १२×२½ ग्रन्थसंख्या ७०० । पत्रसंख्या २२ । मध्यखण्डिता ।

आदिवाक्यम्—

नमो बुद्धाय । उत्पत्स्यते मम तु कोपि य आह मत्वा तं श्रीप्रजापतिरनर्घरहस्यरत्नं । तत्प्राकृतंविविधवक्रिमदेशिचित्रं वैदर्भसदृशोधजुना पदेन ॥ तद्वर्त्मना विविध भावनृपेन्द्रसंपदुल्लासितोरुरसभङ्गतरङ्गरङ्गं । श्रीभावभूतहृदयामृतसारसिन्धुं दृष्ट्वा निहन्तु सुहृदः सदृशो यदि स्युः ॥ ततप्रविशत कामन्दकी अवलोकिता वा वत्से अवलोकिते ॥ अब ॥ आज्ञापयतु भगवती काम अयेनमित्यादि ॥ अब ॥ महान् खलु भगवत्या एष चित्तास्थेयः । आश्चर्यं । यदिदानीं वीरचीवरपिण्डपात्रमात्र व्यापारेण प्राणयन्ती प्राणान्धारयन्ती भगवती इदृशे आयासे अमात्यभूरिवसुर्नियोजयति । तत्र वोत्खटितसंसार ग्रह आत्मा युष्माभि र्नियुज्यते ।

पुष्पिकावाक्यानि—

वकुलवीथिकाभिधानः प्रथमोऽङ्कः ।

मालत्यनुतापो नाम द्वितीयोङ्कः ।

शार्दूलाभिधानतृतीयोङ्कः ।

सखीत्यादि शङ्कर (शङ्का) गृहन्नाम चतुर्थोङ्कः

श्मशानपरिक्रमो नाम पञ्चमोङ्कः

चौरिकाविवाहोनाम षष्ठोङ्कः ।

मदयन्तिकाविवाहोनाम सप्तमोङ्कः।

मालतीवासगृहद्वितीयहरशो नाम अष्टमोङ्कः ।

(उप) संहाराभिधानो नाम दशमोङ्कः ।

पुण्यं यदत्र लिखनेन मयाशुधाङ्ग शोचिसयत्नममलं लब्ध कथञ्चित् । तेन प्रगल्भरसभाव सुधापयोधिर्लक्ष्मीं भजन्तु गुणिनी भवभूति वा चः भूगब्भंभवभूतिचि श्रींकण्ठापदलाञ्छनैः एभिर्नामाक्षरैः ख्यातो यस्तत्र प्राज्ञभञ्जनं ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मालतीमाधवटीका भरतमञ्जरिकाख्या

क्रमाङ्कः च. **विषयाङ्कः १००**

टीकाकारः दशरथः। ताडपत्राणि। नेवारी लिपिः। पङ्क्तयः ७।८। आकारः १२×२३/४
ग्रन्थसंख्या ७००। पत्रसंख्या २६। मध्यखण्डिता।

आदिवाक्यम्—

नमो बुद्धाय। श्रीमत्प्रजापतिगुरोर्भरतादिशास्त्रं श्रीभावभूति (भावभूत) रसभावनिधि निबन्धं। त्वा यदत्र विवृतं रसभावतत्त्वं तद्दृश्यतां दशरथेन विचार्य धीराः॥ ततः नान्दीश्लोकावतारः। यद्यप्यङ्गानि भूयान्सि पूर्वरङ्गस्यनाटके तथाप्यवश्यकतव्या नान्दीविघ्नप्रशान्तये॥ अत एव कविना विघ्नशान्त्यर्थं नान्दाश्लोकेन भगवानेव विघ्नशान्तिकरः कीर्तितः। नान्दी तु मङ्गल्याशीर्वचनसंयुता। अष्टाख्यपदसंयुक्ता विचित्रा वेदनिर्मिता॥यथा दिश्याद्वो मङ्गलं शम्भुः पान्तु वस्तस्य मूर्तयः। तदनुध्ययिनो देवा क्षिण्वन्तु दुरितानि वः। तथा कोहलोप्याह। आशीर्वचनसंयुक्ता यस्मान्नित्यं भवेदिह। देवद्विजनृपादीनां तस्मान्नान्दीति शब्दिता। इयञ्चाष्टपदा दशपदा समपदा कायति। इयं समपदा नान्दी। सानन्दामित्यादि। वैनायक्यो वदनविधुतयश्रीत्कारवत्यश्चात्कारयुक्ताश्चिरं वो युष्मान् पान्तु। कस्मिन् सति फणिपतौ नागराजे नासारन्ध्रं[ ]विशति विभूते भोगसंकोचभाजि प्रवेशे भोगसंकोचो विस्तारतया स्वभावाद्वा। ननु प्रवेश एव कुतः सानन्द यथा तथा नन्दिहस्तेनाहतश्चमुरजश्चतस्य रवेणाहूतश्च कौमारवर्हीं च तस्य त्रासात्।

पुष्पिकावाक्यानि—

इति प्रथमोऽङ्कः।
इति द्वितीयोऽङ्कः।
इति तृतीयोऽङ्कः।
इति चतुर्थोऽङ्कः।
इति भवभूतौ पण्डितश्री दशरथावरचिता भरतमञ्जरिकाभिधा नाटिका समाप्तेति।

मालतीमाधवटीका

क्रमाङ्कः प्र. ५२५ **विषयाङ्कः १०१**

ग्रन्थकारः म. म. जगद्धरः। मध्यदेशीयं कागतम्। देवनागरी लिपिः। पंक्तयः १२ आकारः १३×४। ग्रन्थसंख्या १४००। पत्रसंख्या २६। वि. सं. १८३५। आदिखण्डिता।

आदिवाक्यम्—

श्री॥ अधुना मालतीरूपधारिणा मकरन्देन कथं नदनविप्रलंभो मदयन्तिकाहरणं वृतं भवेदिति प्रवन्धाभिधानायति मुवत्तैव तत्र मयेत्यादिना प्रथमाङ्कः सूचित बुद्धरक्षिता प्रवेशः।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पुष्पिका—

इति सप्तमोऽङ्कः।

इति अष्टमोऽङ्कः।

इति श्रीमालतीमाधवटीकायां नवमोऽङ्कः।

अन्तिमं वाक्यम्—

येनापाठि कठोरगौतममतं वैशेषिकं खण्डनं येनाश्रावि सकोषकाव्यनिवहं तत्पाणिनियं मतम्। छन्दोलङ्करणं च भव्यभरतं येनाध्यगापि श्रुतिस्तस्यामुष्यजगद्धरस्य कवितानुर्ष्टीयमुज्जृम्भताम्॥ असूत यं रत्नधरोतिरम्योऽतिभव्यरूपा दमयन्तिकापि। जगद्धं तत्कृतटिप्पणोऽङ्कः समाप्तिमापद्दशमोनवद्यः॥ इति श्रीमन्महामहोपाध्यायधर्माधिकरणिक श्रीजगद्धरकृतमालतीमाधवटीकायां दशमोऽङ्कः समाप्तिमगमत्।

भूतत्रिवर्स्विन्दुमिते सुवत्सरे ईषसमासस्य विशद्दलेदम्। वन्हेस्तिथौ चान्द्रमसेन्हि पूणतां श्रीमालतीमाधवटिप्पणं ययौ॥ शुभमस्तु॥

मुदावतीहरणम्

क्रमाङ्कः प्र. ११४५ **विषयाङ्कः १०२**

ग्रन्थकारः- भूपतीन्द्रमल्लः। नेपालीयं कागतम्। नेवारी लिपिः। पङ्क्तयः ७। आकारः १२½×३½। ग्रन्थसंख्या ८००। पत्रसंख्या ४८। उपान्त्यखण्डितम्।

आदिवाक्यम्—

ॐ श्री ३ नाटेश्वराय नमः। नान्दिश्लोकः। अर्द्धाङ्गे ललितागिरीन्द्रतनया गङ्गा जटायां शिरा यस्याङ्गे सुभगं विभूतिधवलं मौलौ हिमांशु(म्)दधत्। विघ्नध्वंसपटुर्महाहिवलयी व्याघ्र जिनं धारयन्। शंभुस्ताण्डवकेलिभावकुशलो नृत्येश्वरः पातु वः॥ नान्दिमे॥ प्रलया पयोधिमा॥ नान्दिमालव॥ थ. रु.प. ए.प्र.॥ कुमुदधवल अङ्गे अर्द्ध ईशरि सोहे सुन्दरि शंकरमानस मोहे मण्डनकलितनिशेश॥ जय २ देव महेश॥ध्रु॥

पुष्पिकावाक्यानि—

इति प्रथमोऽङ्कः।

इति द्वितीयोऽङ्कः।

इति तृतीयोऽङ्कः।

इति श्री. सूर्यकुला)वतंशश्राश्रीजयभूपतीन्द्रमल्लदेवविल(र)चिते मुदावतीहरणनामनाटके चतुर्थोऽङ्कः श(स)माप्तम्।

मुदितकुवलयाश्वनाटकम्

क्रमाङ्कः प्र. ४६१ **विषयाङ्कः१०३**

ग्रन्थकारः जगज्ज्योतिर्मल्लः। ताडपत्राणि। नेवारी लिपिः। पङ्क्तयः ५। आकारः १२½×२½। ग्रन्थसंख्या ५००। पत्रसंख्या ४३। समयः शाके १५५०। पूर्णम्।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

आदिवाक्यम्—

श्रीगुरुभ्यो नमः॥ श्रीपरदेवतायै नमः॥ श्रीसावरणार्द्धनारीश्वरनृत्यानन्दस्वरूपेभ्यो नमः। कुवलयाश्वमदालसानाटकगातं लिख्यते॥ नान्दीगीतम्॥ राजविजय॥ ए॥ रजतकनकरङ्ग ईश गोरिसंग एकहिकलेवरवासे पुर आसे॥ शिरसुरसरिधार कुसुममालवर इन्दुसिन्दुविन्दुसोहे मनमोहे। कानकुण्डलडोलफणिमणिनिरमलहाडमाल किङ्किनिवाजे भलछाजे॥ वाघछालरुण्डमाल नेतमोतिमहार पहिरण ईसवरीति जगजीति॥ चण्डिचरणरचितशिवकभगति जुन नृप जगजोति एहोभनि अवधाने॥५॥ १॥

पुष्पिकावाक्यानि—

इति प्रथमोऽङ्कः।

इतिद्वितीयोऽङ्कः।

इति तृतीयोऽङ्कः।

इति श्रीमच्छ्रीश्रीजयजगज्ज्योतिर्मल्लविरचितं मुदितकुवलयाश्वनाटकं समाप्तम्।

अन्तिमवाक्यम्—

कायेन मनसा वाचा यच्चतौर्य्यत्रिकादिकम्। मया विधीयते मातर्भवती तेन तुष्यतु॥ मार्कण्डेयपुराणान्तर्गतमेतन्मदालसोपाख्यानम्। दृष्ट्वा भाषागीतनाट्यं रचितं विचित्ररसभावयुतम्॥ श्रीमता श्रीजगज्योतिर्मल्लभूपतिसूरिणा। अत्र शङ्का नकर्तव्या कथा छाप्तापरैरिति? खशरहरमुखेन्दु १५५० व्यश्विते शाकवर्षे स्मरतिथिबुधमैत्रेष्वर्जुने ज्येष्ठपक्षे। बुधवरकृतसङ्गः श्रीजगज्ज्योतिराशैर्मुदितकुवलयाख्यं नाटकं चारु चक्रे। समयः संवत् ७४८ ज्येष्ठ शुक्ल १३ शिवमस्तु।

मुद्राराक्षसनाटकम्

क्रमाङ्कः प्र. १४२१ **विषयाङ्कः १०४**

ग्रन्थकारः—विशाखदत्तः। नेपालीयं कागतम्। नेवारी लिपिः। पङ्क्तयः ५।६। आकारः ९×३। ग्रन्थसंख्या ५५०। पत्रसंख्या ६७। आद्यन्तरहितम्।

मुद्राराक्षसनाटकम्

क्रमाङ्कः प्र. १६९२ **विषयाङ्कः १०५**

ग्रन्थकारः—विशाखदत्तः। ताडपत्राणि। नेवारी लिपिः। पङ्क्तयः ६। आकारः १२×२। ग्रन्थसंख्या १६००। पत्रसंख्या ७८। समयः सं. ५९१। पूर्णम्। कीटदष्टं जीर्णशीर्णञ्च जयार्जुनदेवस्य राज्ये गोमेन्द्रचन्द्रेण लिखितम्।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मुद्राराक्षसनाटकम्

क्रमाङ्कः १५६६ **विषयाङ्कः १०६**

ग्रन्थकारः—विशाखदत्तः । नेपालीयं कागतम् । नेवारी लिपिः । पङ्क्तयः ६ । आकारः ८$\frac{५}{२}$×३ । ग्रन्थसंख्या ९०० । पत्रसंख्या ७६ । अपूर्णम् ।

मुद्राराक्षसनाटकम्

क्रमाङ्कः तृ. ११७ **विषयाङ्कः १०७**

ग्रन्थकारः—विशाखदत्तः । नेपालीयं कागतम् । देवनागरी लिपिः । पङ्क्तयः ८ । आकारः १३$\frac{१}{४}$ × ३$\frac{१}{२}$ । ग्रन्थसंख्या १४०० । पत्रसंख्या ४७ । पूर्णम् ।

मुद्राराक्षसनाटकम्

क्रमाङ्कः प्र. १६९७ (ख.३-१) **विषयाङ्कः १०८**

ग्रन्थकारः—विशाखदत्तः । नेपालीयं कागतम् । नेवारी लिपिः । पङ्क्तयः ७ । आकारः ११,$\frac{३}{०}$×३ । ग्रन्थसंख्य १८९ । पत्रसंख्या ९ । पत्राङ्कः ५-२६ । आदिमध्यान्तविकलम् प्रकीणरूपम् ।

मुद्राराक्षसनाटकम्

क्रमाङ्कः प्र. १६९७ (ख. ३-१) **विषयाङ्कः १०९**

ग्रन्थकारः—विशाखदत्त । नेपालीयं कागतम् । नेवारी लिपिः । पङ्क्तयः ७ । आकारः ११$\frac{३}{८}$ × ३ । ग्रन्थसंख्या ४६२ । पत्रसंख्या २२ । पत्राङ्काः ३१-६४ । आदिमध्यान्तविकलं प्रकोणरूपम् । (विवरणसाम्येऽपि पुस्तकमिदं पूर्वस्माद् भिन्नमेव) ।

मुद्राराक्षसनाटकम् (सटीकम्)

क्रमाङ्कः प्र.१११० **विषयाङ्कः ११०**

ग्रन्थकारः विशाखदत्तः । टीकाकारः ढुण्ढिराजः । मध्यदेशायकागतम् । देवनागरी लिपिः । पङ्क्तयः अनियताः । आकारः ९$\frac{३}{४}$ × ३$\frac{१}{२}$ ग्रन्थसंख्या १५० । पत्राङ्काः ५५-९९ । पत्रसंख्या ५ । समयः शाके १३-३५ । आदितः खण्डितम् ।

मुद्राराक्षसनाटकम् (सटीकम्)

क्रमाङ्कः प्र. १४५८ **विषयाङ्कः १११**

ग्रन्थकारः विशाखदत्तः । टीकाकार ढुण्ढिराजः । मध्यदेशीयं कागतम् । देवनागरी लिपिः ङ्क्तयः अनियताः । आकारः १०×३$\frac{३}{४}$ । ग्रन्थसंख्या २५०० । पत्रसंख्या ९९ । ७ अङ्कान्तं पूर्णम् । समयः शाक १६९१ ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

आदिवाक्यम्—

श्रीगणेशाय नमः ।। सिन्दूरारुणगण्डमण्डलमदामोदभ्रमद्भृङ्गिकासं(भं)कारेण कलेन कर्णमुरजध्वानेन मन्द्रेण च । तत्तौर्यत्रिकरीतिमेति शिरसः शश्वन्मदान्दोलनं यस्य श्रीगणनायकः स दिशतु श्रेयांसि भूयांशि(सि) वः ।।१।। श्रीमद्कोशलवंशभूपतिकुलामात्येषु विख्यातिमान्भारद्वाजकुलार्णवेन्दुरुदभूद्वावाजिरम्याहितः । पुत्रस्तस्य किलैकभूपतिमणे मन्त्री सदैवादतस्तेनासीद्गुरुवत्प्रगल्भधिषणो गंगाधराख्योध्वरी ।।३।।

